यद्दत्तु भिक्षुस्य गिलानकस्य ।
विसर्पु शान्तश्च[5] स धर्मभाणके
कृतं मया गौरवु बुद्धवर्णितम् ॥२८॥
चारित्रवन्तस्य बहुश्रुतस्य
इमं समाधी वरधारकस्य ।
यन्मे तु त्यक्तं स्वकमात्ममांस[6]-
मेतेष धर्माण भवेय्य लाभिनी[7] ॥२९॥

1 A & B निष्क
2 A ०तृप्तमेति ; B तृप्तमेन्ति
3 A तादृश
4 B विनोन्ति
5 B विसर्प्यसान्तश्च
6 Tib. 199a, l. 2 : འདི་ལྟར་བདག་གིས་རང་གི་ཤ་བཏང་བས །
7 A भवेय ला० ; B भवेय लाभी

यथैव गन्धः सुरभी मनोरमः
कालानुसारी शुभ[1]चन्दनस्य ।
प्रवाति गन्धो दशसु दिशासु
एमेव गन्धोपम धर्मभाणकाः ॥३०॥

यथैव मेरुर्दिशतासु दृश्यते
समन्त प्रासादिकु दर्शनीयः ।
अवभासयन्तो दिशतासु रोचते
तथैव मेरूपम धर्मभाणकाः ॥३१॥

यथैव स्तूपं पतमानु[2] कश्चिद्
व्युत्थापयेत् संस्करि पण्डितो नरः ।
यस्तत्र स्तूपे[ऽ]पि प्रसादु कुर्याद्[3]
व्युत्थापितो [येन] स तस्य हेतुः ॥३२॥

[4]एमेवयं धर्मस्तूपो गिलानको[5]
विमोचितो[6] लोहितलेपनेन ।
स्वकेन मांसेन [च] धर्मगौरवाद्
दीपो मया दीपितु जम्बुद्वीपे ॥३३॥

एषोऽकरिष्यद्[7] यदि भिक्षु कालं
समाधिशब्दोऽपिह[8] जम्बुद्वीपे ।

1 A & B हरि० ; Tib. 199a, l.3: ཙནྡན་དམར་པོ།
2 A पतमो न ; B स्तूप पतमानु ; C पतमांनु
3 B प्रवाति मादु कुर्य्याद्
4 C इमे०
5 B ०स्तूपोसिला०
6 A विलापितो
7 A ०ष्येद्
8 A & B हि

निरुद्धु सत्त्वान[1] सदाभविष्य[त][2]
चिकित्सितेऽस्मिन् स समाधिलब्धः[3] ॥३४॥
सर्वस्य लोकस्य [परि]त्राणु [4]भिक्षु-
रन्धस्य लोकस्य च [5]चक्षुदायकः ।
रागस्य दोषस्य मोहस्य चैव
चिकित्सकोऽयं मम[6] वैद्यराजः ॥३५॥
महद्गते चित्ति सदा प्रतिष्ठितः
प्रमाणु चर्याय[7] न तस्य लभ्यते ।
[8]सुविनिश्चितार्थेषु पदेषु शिक्षितो
अनाभिभूतश्च परप्रवादिभिः ॥३६॥
न मह्य भूयो[9] विनिपाततो भयं
स्त्रीत्वं पुनर्मे न च भूयु[10] भेष्यति ।

1 A & C निरुद्धसत्त्वन   2 B भविष्येच्चिकित्०

3 A & C ०स्मिन्न समाधि० ; Tib. 199a, l. 7:

དགེ་སློང་འདི་ནི་འཆི་བའི་དུས་བགྱིས་ན།
ཛ་སྦྱིའི་གླིང་དུ་ཏིང་འཛིན་སྨྲ་ཡང་ནི།
སེམས་ཅན་རྣམས་ལ་རྟག་ཏུ་ནུབ་པར་འགྱུར།
འདི་གསོས་པས་ནི་ཏིང་འཛིན་རྣམས་ཀུང་འཐོབ།

4 B पुत्राणु   5 A लोकस्य सु० ; C यु

6 A मह ; B मह्य०   7 B चर्य्यार्यै

8 A सुनिश्चि०   9 A भूमौ ; B न महद्भूमौ

10 A & B ०में न कदाचि

सहस्रकल्पान च[1] कोटियो भुयो[2]
कृत्वा परं गौरवु धर्मभाणके[3] ॥३७॥
यो बुद्धक्षेत्रान् यथ गङ्गबालिकाः[4]
रतनान पूर्णान् ददि[5] नायकानाम् ।
यश्चैव पादांगुलिमेक दद्या-
दिदं त[तः] पुण्यु विशिष्यते[6] परम् ॥३८॥
सा दारिका कालमितश्च[7] कृत्वा
[अद्रा]क्षि बुद्धान सहस्रकोटयः[8] ।
सर्वेष चो शासनि प्रव्रजित्वा
इमं वरं शान्तु समाधि [दे]शयी ॥३९॥
सर्वेष तेषां द्विपदोत्तमानां
परिनिर्वृतानां चरमिस्मि[9] काले ।
प्रव्रज्य लाभिन्यमु[10] नित्यकाल-
मसंकिलिष्टाः सुगतान पुत्रकाः[11] ॥४०॥

1 B drops च
2 A & B कोटि भूयो ; C भ्यूयोः
3 A & B & Tib. 199b, l. 4 add :—तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म । तस्मात्तर्हि कुमारेमां परमां दुष्कराश्चर्याद्भुतां बोधिसत्त्वधर्मान् श्रुत्वा त्वया आबाधिकाः धर्मभाणकाः परमदुर्लभभैषज्योपस्थायकपरमाः स्वमांसशोणितेनोपस्थातव्याः । अन्तश एकांगुलिप्रदानेनापि ते कुमार जंगमा धर्मस्तूपा अशाठ्येनोपस्थातव्याः । अथ खलु भगवांस्तस्यां वेलायां चन्द्रप्रभस्य कुमारभूतस्यैममेव पूर्वयोगकथानिदर्शनं भूयस्या मात्रया गाथाभिगीतेन विस्तरेण सम्प्रकाशयति स्म ।
4 A ० वालुका ; B ०कान्
5 C पूर्णा ददि
6 A भविष्यते ; B पुण्युष्यते
7 B कालिमितश्च
8 B बुद्धान शतसहस्रकोटियः
9 A & B चरिमस्मि
10 B लाभिन्यहु नित्य
11 A सुगतसु पुत्रिका ; B सुगतस्य निका

दीपप्रभस्याथ[1] तथागतस्य
चरित्व सा शासनि ब्रह्मचर्यम् ।
स्त्रीभावु तस्मिन्[2] विनिवर्तयित्वा
अभूसि भिक्षुस्तद धर्मभाणकः[3] ॥४१॥

मैत्रेय ज्ञानम्बलु[4] सो नरेन्द्रः
सद्धर्मपरिग्राहकु नित्यकालम् ।
दीपङ्करोऽसौ अभूद्धर्मभाणको[5]
अहं च आसं तद[6] राजधीता[7] ॥४२॥

स्वकेन मांसेन च शोणितेन चो
उपस्थितो मे तद धर्मभाणकः ।
शाठ्यं च[8] सर्वं परिवर्जयित्वा[9]
इमं समाधिं प्रतिकांक्षता तदा[10] ॥४३॥

येभी[11] तदा रोदितु भिक्षु दृष्ट्वा
गिला[न]कं पीडितु वेदनाभिः ।

1 B दीपप्रभावस्याथ 2 A तस्मि ; C तस्मान्
3 A अभूत् सु भिक्षुर्विदु ; B अभूत भिक्षु विदु धर्मभाणकम्
4 A & C मैत्रैयु ज्ञानधनु 5 B अत्भूतधर्म० 6 A आसंस्तद
7 A & B & Tib. 200a, l. 5 add :—
सा देवता आसि पुराण [सा]लोहित नरेन्द्र ज्ञानाबल पृष्ठतोऽनुगा ।
स्वप्नान्तर बोधितु याय राजा अक्षोभ्यु साभूच्चरमाणु चारिकाम् ॥
8 B साध्यश्च 9 B ०त्वात्
10 A & B मया ; B adds पुनरपि
चन्द्रप्रभकुमार आसी पुराणलोहिता नरेन्द्र श्रीराजः स्थिपृतान् ।
स्वप्नान्तरे बोधितु याय राजः अक्षोम्य सोभूच्चरमाणु चारिकाम् ॥
11 B येही

अविवर्तिकास्ते सद सर्वि[1] भूवन्
न जातु जाता[2] विनिपातभूमिम् ॥४४॥
नाभूसि तेषां सद अक्षिरोगो
न शीर्षरोगो[3] न च कर्णरोगः ।
न घ्राणरोगो[4] न च जिह्वरोगो
न च दन्तशूलं[5] न कदाचिदासीत् ॥४५॥
समन्त प्रासादिकु भोन्ति नित्यं
शिरीय तेजेन ज्वलन्तकायाः ।
द्वात्रिंशकेतुशतपुण्यलक्षणा
उपस्थितो[6] यैस्तद भिक्षु ग्लानकः ॥४६॥
मह्यं च ते[7] शासनि प्रव्रजित्वा
प्रलुज्य[8]मानानिमु बुद्धबोधिम् ।
धारित्व ते गंजु तथागतानां
द्रक्ष्यन्ति बुद्धान सहस्रकोटियो[9] ॥४७॥
सुसंगृहीत्वानिम बुद्धबोधिं
धारेत्व नित्यं च हि[10] गौरवेण ।

1 B तद सर्वं
2 B & C याता
3 A drops न शीर्षरोगो
4 A adds न कायरोगो
5 C च्चितशूलं
6 A लक्षणामुपस्थितो वै
7 B मातश्च ते
8 B & C प्रलुभ्यमा० ; Tib. 200b, l. 3 རབ་དུ་འཇིག་དུས །
9 A ०कोटयः ; B ०कोटियः
10 A धारित्व नित्यं हि च ; B धारयित्व नित्यश्च हि

ते अर्थु कृत्वा विपुलं प््रजानां
द्रक्ष्यन्ति अक्षोभ्य नराणमुत्तमम् ॥४८॥
श्रुत्वा च ते चर्य निरुत्तरामिमां
लप्स्यन्ति प्रीतिश्चरियां निरामिषाम् ।
श्रुत्वा च ते आत्मन पूर्व चर्यां
काहिंति बुद्धान उदार पूजाम् ॥४९॥
दृष्ट्वा च भिक्षून् विदु शीलवन्तो
अशाठियेनो[1] सद सेवितव्याः ।
अखिलं च दोषं च विवर्जयित्वा
सेवेत भिक्षुं तद धर्मभाणकाः[2] ॥५०॥
आघातु[3] क्रोधं च विवर्जयित्वा
पूजेथ पुत्रान्मम धर्मशासने[4] ।
मा अन्धभूता[5] बहुकल्पकोटियो
विनिपातप्राप्ताश्च भवेत दुःखिताः ॥५१॥
न शीलु त्रायेत श्रुतं च तस्य
न ध्यानु त्रायेन्न अरण्यवासः ।
तदा नु त्रायेन्न [च] बुद्धपूजा
व्यापादु कृत्वान परस्परेण ॥५२॥

[इति श्रीसमाधिराजे ज्ञानावतीपरिवर्तश्चतु-
स्त्रिंशतितमः] ॥ ३४॥

1 C निःशाठ्ययेनो
2 B भिक्षु' विदु धर्मभाणकाः
3 A आघात ; B आघातश्च
4 A & B & Tib. धर्मपालान्
5 C अन्धभुतान्

पञ्चत्रिंश-परिवर्तः

अथ खल्वायुष्मानानन्द उत्थायासनादेकांसमुत्तरासंगं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन भगवांस्तेनाञ्जलिं प्रणम्य भगवन्तमेतदवोचत्। पृच्छेयमहं भगवन्तं तथागतमर्हन्तं सम्यक्संबुद्धं कञ्चिदेव प्रदेशं[1] स चेन्मे भगवानवकाशं कुर्यात्[2] प्रष्टव्यप्रश्नव्याकरणाय[3]। एवमुक्ते भगवानायुष्मन्तमानन्दमेतदवोचत्। तेन ह्यानन्द स्वके आसने निषद्य पृच्छ त्वं तथागतमर्हन्तं सम्यक्संबुद्धं यद्[4] यदेवाकांक्षसि अहं ते[5] तस्य तस्य[6] प्रश्न[स्य][7] व्याकरणेन चित्तमाराधयिष्ये। एवमुक्ते[8] आयुष्मान् आनन्दो भगवन्तमेतदवोचत्। कृतावकाशोऽस्मि भगवन् कृतावकाशोऽस्मि सुगत प्रश्नव्याकरणाय[9]। अथ खल्वायुष्मानानन्दो[10] भगवतः पुरतः आसने निषद्य [11]भगवन्तमेतदवोचत्। को नु[12] भगवन् हेतुः कः प्रत्ययो यदिहैकत्या बोधिसत्त्वा[13] बोधिसत्त्वचारिकां

1 B ०देवसं

2 A दद्यात्

3 C पृष्टः प्रश्नव्याकरणेन

4 B यच्च ये वा कांन्तस्यर्हन्ते

5 B & C add तं तमेव प्रश्नं पृच्छ

6 A & B तस्यैव

7 B पृष्टस्य

8 B एवमुक्तो

9 A ०णास्य

10 A & B add भगवतोऽनुज्ञाते

11 A निषद्य प्राञ्जलिको भग० ; B निषद्य स प्राञ्जलिको भग०

12 A drops नु

13 A adds महासत्त्वा अनन्तां ; B यदि है कल्प बोधिसत्त्वा महासत्त्वा अनन्त

चरमाणा हस्तच्छेदान् पादच्छेदान् कर्णच्छेदानक्ष्युत्पाटनानि[1] अङ्गोत्तमाङ्गच्छेदान् निगच्छन्ति प्रत्यङ्गच्छेदान् च[2]। विविधानि [दुःखानि] प्रत्यनुभवन्ति। नो च[3] हीयन्ते न [च] परिक्षीयन्तेऽनुत्तरायाः सम्यक्संबोधेः। [एवमुक्ते भगवानायुष्मन्तमानन्दमेतदवोचत्। स च त्वमानन्द जानीया यानि मे दुःखानि प्रत्यनुभूतानि इमामनुत्तरां सम्यक् संबोधिं] समुदानयितुम्[4]। एतदपि[5] ते च प्रतिभायात्। किं पुनर्यत्तथागतं[6] [7]परिप्रष्टव्यं मन्यथा[8]। तद् यथापि नामानन्द इह कश्चिदेव पुरुषः अधस्तात् पादतलमुपादाय यावन्मूर्धकादीप्तो भवेत् प्रज्वलितः[9] एकज्वालीभूतस्तं कश्चिदेव पुरुष उपसंक्रम्य एवं वदेत्। एहि त्वं भोः पुरुष [अ]निर्वापितेनात्मभावेन[10] पञ्चभिः कामगुणैः समर्पितः समन्वङ्गीभूतः[11] क्रीडस्व रमस्व परिचारयस्वेति। तत् किं मन्यसे आनन्द। अपि तु स पुरुषः अनिर्वापितेनात्मभावेन पञ्चभिः कामगुणैः समर्पितः समन्वङ्गीभूतः क्रीडेत रमेत[12] परिचारयेत[13]। [आनन्द] आह। नो हीदं

1 A & B कर्णनासाच्छेदांश्चक्षूत्पाटनानि शीर्षच्छेदान्

2 A निगच्छन्ति अन्यानि च ; B अन्यानि च

3 B drops च

4 Tib. 201b, l. 6: ཡང་དག་པར་སྒྲུབ་པ་ན། समादापेतुम्।

5 A & B ०दपि ते आनन्द प्रति०

6 C पुनर्यत्व तथा०

7 A प्रतिस्पृष्टव्य०

8 Tib. 202b, l. 7: ཡོངས་སུ་འདྲི་བར་ཞེམས། for मन्यसे

9 A & B संप्रज्वलिते भवेत्

10 B ०भावतः

11 A & B समंगीभूतः

12 B क्रीडते रमते

13 B ०यति

भगवन् । भगवानाह । [1]क्रीडेतानन्द स पुरुषो रमेत परिचारयेत परिकल्पमुपादायानिर्वापिते[ना][2]त्मभावेन पञ्चभिः कामगुणैः समर्पितः समन्वंगीभूतः। न त्वेव तथागतस्य पूर्वं बोधिसत्त्वचारिकां चरमाणस्य सत्त्वांस्त्रिभिरपायैर्दुःखितान् दृष्ट्वा दरिद्रान्नाभूत्[3] सुखं वा सौमनस्यं वा चित्तप्रहर्षो वा । ये आनन्द बोधिसत्त्वा [महासत्त्वाः] पूर्वं बोधिसत्त्वचारिकां[4] चरमाणा अखण्डशीला भवन्ति[5] अच्छिद्रशीलाः अकल्माषशीला[6] अशबलशीलाः अपरामृष्टशीलाः अचलितशीलाः[7] अलुडितशोला अकोप्यशीलाः नोत्तानशीलाः [न] [8]परदर्शनशीलाः न विसंवादनशीलाः ऋजुशीलाः यथाप्रतिज्ञाशीलाः [9]सत्त्वानुग्रहशीलाः। एवंरूपेण शीलेन समन्वागता भवन्ति । ते आनन्द बोधिसत्त्वा महासत्त्वा अनन्तां बोधिसत्त्वचारिकां चरमाणा न हस्तच्छेदेन परिहाणिं निगच्छन्ति । न पादच्छेदेन परिहाणिं निगच्छन्ति । न कर्णनासाच्छेदेन परिहाणिं निगच्छन्ति । न नेत्रोत्पाटनशीर्षच्छेदेन परिहाणिं निगच्छन्ति[10] । नाङ्गप्रत्यङ्गच्छेदेन परिहाणिं निगच्छन्ति । न च विविधानि दुःखानि प्रत्यनुभवन्ति । क्षिप्रं चानुत्तरां सम्यक्संबोधिमभिसंबुध्यन्ते[11] ।

1 B क्रीड़त आ० 2 B ०निर्वातेना०
3 C दरिद्रानभूत् 4 A & B ०सत्त्वचर्यां
5 A drops भवन्ति ; B ०णा अथ खण्डशीला भवति
6 A drops अकल्माषशीला 7 B adds अखण्डितशोला
8 A नापरये ; B न पर० 9 A सत्त्वा अनु०
10 A & B add तदनेनापि ते आनन्द पर्यायेणैवं वेदितव्यं ।
11 Tib. 202b, l. 6 marks here བམ་པོ་བཅུ་གཉིས་པ །

भूतपूर्वमानन्दातीतेऽध्वन्यसंख्येयकल्पैरसंख्येयतरैर्विपुलैरप्रमाणैरचिन्त्यैरतुल्यैरमाप्यैरपरिमाणैर्यदासीत्तेन कालेन तेन समयेन रत्नपद्मचन्द्रविशुद्धाभ्युद्गतराजो नाम तथागतोऽर्हन् सम्यक्संबुद्धो लोक उदपादि विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवमनुष्याणां[1] च बुद्धो भगवान् । तेन खलु पुनरानन्द[2] समयेन तस्य भगवतो रत्नपद्मचन्द्रविशुद्धाभ्युद्गतराज्ञ[3]स्तथागतस्यार्हतः सम्यक्संबुद्धस्य नवति[4]-कल्पकोटीनियुतशतसहस्राण्यायुष्प्रमाणमभूत् । सर्वत्र च दिवसे [5]नवतिकल्पकोटीशतसहस्राणि सत्त्वानामवैवर्तिकतायां बुद्धधर्मेषु प्रतिष्ठापयति[6] [स्म] । तेन खलु पुनरानन्द समयेन तस्य भगवतो रत्नपद्मचन्द्रविशुद्धाभ्युद्गतराज्ञ[7]स्तथागतस्यार्हतः सम्यक्संबुद्धस्य परिनिर्वृतस्य चरमिकायां पञ्चाशति[8] सद्धर्मान्तर्धानकाल[9]समये सद्धर्मविप्रलोपे वर्तमाने[10] इम एवंरूपाः सूत्रान्ता बहुजनजुगुप्सिता

1 A & B देवानां च मनु॰

2 A & B add कालेन तेन

3 A ॰राजस्य त॰ ; B राजो तथा॰

4 A & B नवनवति॰

5 A दिवसे दिवसे नवनवतिकोटीनियुक्तशत॰ ; B कोटीनियुत॰

6 A & B & Tib. add प्रतिष्ठाप्य परिनिर्वाप्याप्रमेयानसंख्येयान् सत्त्वानास्रवक्षया-यार्हत्त्वे प्रतिष्ठापयति स्म । प्रतिष्ठाप्य परिनिर्वाप्याप्रमेयानसंख्येयांश्च सत्त्वाननुत्तरायां सम्यक् संबोधावविनिवर्तनीयत्वे प्रतिष्ठाप्य परिनिर्वृतोऽभूत् ।

7 A ॰गतराजस्य तथा॰ ; B राजतथागत॰

8 A & B चरिमिकायां पञ्चाशत्यां

9 B drops काल

10 A & B & Tib. add राजाभूच्छूरदत्तो नाम । तस्य चानन्द राज्ञः शूरदत्तस्याशीतिस्त्रीसहस्राण्यन्तःपुरमभूत् । सहस्रं चास्य पुत्राणामभूत् पञ्च च दुहितृशतान्यभूवन् । तेन चानन्द कालेन तेन समयेन राज्ञः शूरदत्तस्य रत्नावती नाम राज-

बहुजनविवर्जिता बहुजनविरुद्धा महाजनोत्सृष्टाश्चाभूवन् । महाभयभैरवकाले वर्तमाने महोपद्रवे अतिवृष्टिकालसमये अनावृष्टिकालसमये[1] वर्तमाने[2] व्याडकालसमये वर्तमाने विद्युत्पातकाल[3]समये[4] दुर्भिक्षकालसमये मिथ्यादृष्टिकालसमये असम्यग्दृष्टिकाल[समये तीर्थिकमन्त्र]पर्येष्टिकालसमये बुद्धबोधेः प्रलुञ्ज्य[मान]कालसमये वर्तमाने सप्त बोधिसत्त्वसहस्राणि ग्रामनगरनिगमराष्ट्रराजधानीजनपदेभ्यो निर्वासितानि । समन्तभद्रं नाम वनखण्डं तदु[प]निश्रित्य विहरन्ति स्म सार्धं सुपुष्पचन्द्रेण धर्मभाणकेन । यस्तेषां भिक्षूणां[5] धारणीधर्मपर्यायं[6] देशयति स्म[7] स खलु पुनः राजा[8] सुपुष्पचन्द्रो धर्मभाणक एको रहोगतः प्रतिसंलीनो दिव्येन

धान्यभूद् विपुला विस्तीर्णा चतुर्द्वारा वितर्दिनिर्यूहतोरणगवाक्षहर्म्यकूटागारप्रासादोद्यानसमलंकृता विचित्रा दर्शनीया अमरपुरप्रकाशा अप्रमेयानामसंख्येयानां सत्त्वानामावासभूमिरभूत । तेन चानन्द कालेन तेन समयेन

1 A adds अकालवृष्टिकालसमये   2 A drops वर्तमाने

3 Mss. विद्युत्कान्तारकल्पसमये Tib. 204a, l. 1 : སྤྲུལ་འབྱུང་བའི་དུས་ཀྱི་ཚེ། ལྷེ་འབབ་བའི་དུས་ཀྱི་ཚེ། མུ་གེ་འབྱུང་དུས་ཚེ།

4 A & B add वर्तमाने   5 A भिक्षूणामिम ; B भिक्षूणां इमं

6 A adds धर्म

7 A & B & Tib. add :—०ति तच्चानन्द वनखण्डं सर्वकालोपदर्शकैः विचित्रपुष्पमञ्जरीलताफलोपेतैरिच्छातरुप्रतिमैर्नानाद्रुमवरैः संछन्नमनेकरूपवर्णैः सर्वबीजांकुरैरलङ्कृतं रुचिरविशालतुङ्गैर्नानापचालनिचयैः कनकपर्वतैरुपशोभितमभिरूपं सिद्धविद्याधरयक्षगन्धर्वकिंपुरुषर्षिकिन्नराधिवासं विविधवर्णरूपोदारैः शकुनिगणैरध्यासितमनेकबुद्धाध्युषितं नन्दनवनमिव समन्ततो भद्रकम् । तस्मिन् योगानुकूले समन्तभद्रे वनवरे योगानुयुक्तास्ते बोधिसत्त्वा विहरन्ति स्म ।

8 A & B पुनरानन्द

शोभितललाटो नीलकुञ्चित[1]केशोष्णीषश्च। मा ते राजपुत्रा वा अन्ये वा तत्प्रतिमा[2] ईर्ष्यामात्सर्योपहतचे[3]]तसो जीविता-[द्व्यवरो]पयिष्यन्ति[4]। अथ खलु[5] सुपुष्पचन्द्रो धर्मभाणकस्तं[6] बोधिसत्त्वगणमेतदवोचत्। स चेन्मे आत्मारक्ष्यो भवेन्न मया अतीतानागतप्रत्युत्पन्नानां बुद्धानां[7] भगवतां शासने आरक्षा कृता भवेत्। तस्यां च वेलायायिमा गाथा अभाषत[8]।

न आत्मसंज्ञाय वसित्व जातु[9]
शक्यं इहा[10] शासनि रक्ष कुर्वणा।
महावितानां[11]सुगतान बोधिः
प्रकाशना पश्चिमि कालि दारुणे ॥१॥
यो आत्मसंज्ञा प्रजहित्व[12] सर्वशः
सत्त्वानिमान् पुद्गलवादनिःश्रितान्।
रूपाणि शब्दांश्च रसांश्च[13] गन्धान्
स्प्रष्टव्यु वर्जेति स रक्षि शासनम् ॥२॥

1 B नीलकुण्डलाकुञ्चित०
2 B प्रतिसमा
3 B ०हत नलिनचे०
4 B ०ति
5 A & B एवमुक्ते
6 A & B add महान्तं
7 A drops बुद्धानां
8 A गाथामभाषत ; B मिमां गाथा अभाषत
9 A & B स्थिति जातु
10 B इहो
11 B महावियूहा ; Tib. 205b, l. 1 :· བཀོད་པ་ཆེན་པོ་ཡིན །
12 A drops 3 lines of stanza 1 from शक्यं upto प्रजहित्व
13 B शब्दा रसाश्च

बुद्धान कोटीनयुतान्युपस्थिहे-
दन्नेन पानेन[1] प्रसन्नचित्तः ।
छत्रैः पताकाभि दीपक्रियाभिः[2]
कल्पान कोटी यथ गङ्गवालिकाः[3] ॥३॥
यश्चैव सद्धर्म प्रलुज्यमाने
निरुध्यमाने सुगतान[4] शासने ।
रात्रिन्दिवं एक चरेय्य शिष्यान्[5]
इदं ततः पुण्यु विशिष्टु भोति ॥४॥
ये दानि ते[षां] पुरुषर्षभाणां
सद्धर्मि लुज्यन्ति[6] उपेक्षि भावयी ।
न तैर्जिना सत्कृत भोन्ति केचिन्
न चो कृतं गौरवु नायकेषु ॥५॥
युष्मे भोथ सुखी स्वकार्थु[7] कु[रु]था गोपायथा आत्मनं
युष्मे भोथ इहाप्रमत्त विनये[8] मैत्रीविहारी सदा ।
शीलं रक्षथ उज्ज्वलं[9] अशबलं शुद्धं शुचि निर्मलं
येही रक्षितु शीलु भोति अमलं बुद्धेभि संवर्णितम् ॥६॥

1 A ०कोटीनियुतान्युपस्थिहे हस्तेन पादेन ; B ०स्थिहेदस्तेन

2 A & Tib. 206, l. 3 पताकाभि च दीपमालैः ; B च दीपमाल्यैः ।

3 A बालुकाः

4 A & B सुगतस्य

5 A एकरेय्या शिक्षामिदं ; B ०दिवसेकचरेय्य शिक्षा ; Tib. 205b, l. 4: ཉིན་མཚན་དུ་ནི་བསླབ་པ་གཅིག་སྤྱོད་པ །

6 B सधर्मि निरुज्यन्ति

7 A & B स्वकार्थं

8 A विषये

9 A उज्जकं

येही[1] सतक्रतु भोन्ति सर्वि सुगता यावन्त पूर्वे अभूत्[2]

तेहि त्रायितु भोन्ति सर्वजनता या बोधिसम्प्रस्थिता ।

तेहि उद्धरिता भवन्ति नरका सत्त्वा बहू पापकाः

येही रक्षितु भोन्ति शीलु अमलं बुद्धैः प्रशस्तं पुरा ॥७॥

दानं देथ [विशिष्टधर्मरतनं क्षान्तिं सदा रक्षथा-

रण्यं [चा]श्रयथा समाधिकुशला भावेथ चो मार्दवम्[3] ।

मा चो विग्रह सर्वथा विचरथा शिष्टां[4] शिवां चारिकां

गच्छामो वयु राजधानि नगरं सत्त्वान त्राणार्थिकाः ॥८॥

तस्मिन्नोतरती महामतिधरे सत्त्वाग्रसारे ऋषौ[5]

वर्तन्ती इमि अश्रुकाः सुकरुणं[6] पादे हि अन्ये पती ।

मा ही ओतरही महामति विदु[7] प्रेक्ष वने पादपान्[8]

मञ्जुगन्धमनोरमान्[9] सरुचिरानात्मान त्राणात्मकः[10] ॥९॥

1 A तेही ; C येनो 2 A यावन्तस्त्वध्वे अभूवन् ; B यावन्ति पूर्वे अ॰

3 B मान्दवाः 4 A & B श्रेष्ठां

5 A ॰रेमृषौ ; C रिसो 6 A & B वर्तन्ती इमि अश्रुकाश्रुकरुणम्

7 C मा हो ओतरतो धर मिदू 8 B पादपा

9 A, B & Tib. मञ्जुघोष मनोरमा

10 Mss. ॰त्मजाः ; Tib. 206a, ll. 4-6:

བློ་གྲོས་ཆེ་འཆང་སེམས་ཅན་དམ་པའི་མཆོག །

ཟང་སྐྱོང་དེ་ནི་འགྲོ་བར་བྱས་པ་དང་ །

ཁ་ཅིག་རྐང་པ་ལ་ཡང་འཛུ་བར་བྱེད །

སྙིང་རྗེ་བར་ཡང་དུ་ཞིང་མཆི་མ་ཟག །

མཁས་པ་བློ་གྲོས་ཆེན་པོ་མ་བཞུད་པར །

སྤྲ་འཛམ་ཡིད་དུ་འོང་ཞིང་མཛེས་པ་ཡི །

तेऽपी पूर्व विनायका दशबलाः शान्तेन्द्रियाः सूरताः
गत्वा काननि शैलशृङ्गशिखरे बोधाधिगम्यां वराम् ।
श्रेष्ठां चारिक बोधिहेतु चरितास्ते[1] पुण्यज्ञानां वराः
तेषां शिक्षिहि कानने निवसतो[2] मा गच्छ त्वं सुव्रत[3] ॥१०॥
गात्रं चित्रितु लक्षणैः सुरुचिरैः केशाश्च नीलास्तवा
वर्णः काञ्चनसन्निभप्रभकरो ओभासते मेदिनीम् ।
ऊर्णा ते भ्रुमुखान्तरे[4] सुरुचिरा शङ्खन्निकाशप्रभा
[मा] ते ईर्ष्यु[5] जनित्व कायु विकिरी[6] राजानुराजे[7] तथा ॥

अथ खल्वानन्द[8] सुपुष्पचन्द्रो धर्मभाणकस्तं बोधिसत्त्वगणं गाथयाभ्यभाषत[9] ।

ཞིང་འདི་རྣམས་ལ་གཟིགས་ཤིང་རྟོག་བ་མཛོད། །
བདག་ཉིད་བསྲུང་བ་མཛོད་ལ་མ་བཞུད་ཅིག །

1 C ०चरतो त

2 A ०सहे ; B निवसही

3 C मा श्रोरुह्याते जवान् ; Tib. 206a, l. 7:

བྱང་ཆུབ་དམ་པ་དག་ནི་ཐུགས་སུ་ཆུད། །
བྱང་ཆུབ་རྒྱུར་ཡང་སྤྱོད་པ་དམ་པ་སྤྱད། །
དེ་དག་བསོད་ནམས་ཡེ་ཤེས་མཆོག་དང་ལྡན། །
དེ་དག་རྗེས་སློབས་ནགས་ཁྲོད་གནས་པར་མཛོད། །
བརྟུལ་ཞུགས་བཟང་པོ་འདི་ནས་མ་བཞུད་ཅིག །

4 A ऊर्णा ते मुखान्तरे

5 B इर्षा

6 A & B विकरी

7 A & C राज्यानुराज्यं

8 A & B अथानन्द

9 A ०या प्रत्यभाषत ; B प्रभाषत

यावन्तः पुरिमेण आसि सुगताः सर्वज्ञ क्षीणास्रवाः
  सर्वे तेऽथकरिंसु लोकि त्रिभवे बोधाधिगम्यां वराम् ।
श्रेष्ठां चारिक बोधिहेतु चरितास्ते[1] पुण्यज्ञानां वराः
  तेषां शिक्षय बोधिसत्त्व नियुता[2]सत्त्वान त्राणार्थिकः ॥१२॥
सर्वे प्रदक्षिणं कृत्व ऋषिविदुं पादानि[3] वन्दित्वना
  घोरम् आश्वसतो स्वनन्ति करुणं क्रन्दन्त[4] आर्तस्वरम्[5] ।
अन्ये च्छिन्न प्रपात मेदिनि पती[6] मूर्च्छित्व सालो यथा
  नो चा ते परिवर्ति पुण्यनिचितः[7] सत्त्वार्थकामो ऋषिः[8] ॥१३
पात्रं चीवरु गृह्य प्रस्थितु[9] ऋषी सिंहो यथा केशरी
  नो चास्यो गुणदोष तत्र अकरी धर्मस्वभावे स्थितः ।
घने[10] काननि अस्मि लोकि[11]वसतः सत्त्वा अपाये पति[12]
  सो भूयं[13] नगरं गमी पुरवरं सत्त्वान त्राणार्थिकः ॥१४॥

1 A & B चारिकहेतु चार० ; C चरतो तं
2 C तेषां शिक्षयतो तुहुनिषि सदा ; Tib. 206b, l. 4-5:
སྤྱོད་པའི་དམ་པ་བྱང་ཆུབ་རྒྱུ་སྤྱོད་དེ། །
དེ་དག་བསོད་ནམས་ཡེ་ཤེས་མཆོག་དང་ལྡན། །
དེ་ཡི་རྗེས་བསླབས་བྱང་ཆུབ་སེམས་དཔའ་ཡང་། །
སེམས་ཅན་ཁྲག་ཁྲིག་རྣམས་ཀྱི་སྐྱབས་བྱེད་འདོད། །
3 B पादान
4 A & B घोरं निस्वसत स्वनन्ति करुणं एतान्ति 5 B ०स्वरः 6 A पति
7 C परिवर्त पुण्यनिच्चियः ; B नो वा तेष निवर्त्ति 8 C रिषिः
9 C प्रष्ठितु ; B प्रतिस्थितु
10 B भामे ; C कामे ; Tib. 207a, l. 2: ནགས་ཁྲོད། ।
11 C कालि 12 C सत्वान अद्योपति 13 Mss. भूत्तं

अथ खलु सुपुष्पचन्द्रो धर्मभाणको ग्रामनगरनिगमराष्ट्र[1]राजधानीरवतरित्वा सत्त्वानां धर्मं देशयति [स्म]। तेन पूर्वाह्णे अवतरित्वा सत्त्वानां[2] नवनवति[3]प्राणि[4]कोट्यो [अ]वैवर्तिकतायां[5] स्थापिताः अनुत्तरायां सम्यक्संबोधौ। न च तां[6] रत्नावतीं राजधानीमनुप्राप्तः। सोऽनुपूर्वेण तां रत्नावतीं [राजधानीमनुप्राप्तः। स तस्यां रत्नावत्यां राजधान्यामुपसंक्रामित्वान्यतरस्मिन् प्लक्षसालमूले व्यहार्षीत्। स तस्या रात्र्या अत्ययेन तां रत्नावतीं राजधानीं प्राविशत्। प्रविश्य षट्त्रिंशत्प्राणिकोटीरवैवर्तिकत्वे स्थापयति बुद्धधर्मेषु। न च[7] तावद् भक्त[कृ]त्यमकार्षीत्। स भक्तच्छेदच्छिन्नो रत्नावत्या राजधान्या निष्क्रम्य येन भगवतो नखस्तूपस्तेनोपसंक्रम्य उत्थितक[8] एव रात्रिन्दिवमतिनामयति स्म। स तस्या रात्र्या अत्ययेन द्वितीये प्राग्भक्ते रत्नावतीं राजधानीं प्रविश्य त्रयोविंशतिप्राणिकोटीरवैवर्तिक[9]बुद्धधर्मेषु प्रतिष्ठापयति [स्म]। न च तावद् भक्तकृत्यमकार्षीत्[10]। स द्वितीयभक्तच्छेदच्छिन्नो रत्नावत्या राज-

1 A & B ॰निगमजनपदराष्ट्र॰

2 A & B drop सत्त्वानां

3 A ॰नवतीः; B & C ॰ति

4 A & B प्राण॰

5 A वैवर्तिकत्वे; B ह्वैवर्तिकत्वे

6 A न च तावतां

7 A drops च; B धर्मेषु च

8 A & C संक्रम्यास्थितक; B अनुत्करिठतक; Tib. 207b, l. 1: འགྲེང་བཞིན་དུ ། = standing.

9 A वर्तिंक

10 A & B ॰कृत्यं कृतवान्

धा[न्या निष्क्रम्य येन भगवतो नखस्तूपस्तेनोपसंक्रम्योत्थितक एव रात्रिन्दिवमति]नामयति [स्म]। स तस्यां रात्र्यामतीतायां[1] त्रिरात्रभक्तच्छेदच्छिन्नो रत्नावतीं राजधानीं प्रविश्य नवनवति[2]प्राणिकोटीशतसहस्राण्यवैवर्तिक-बुद्धधर्मेषु[3] प्रतिष्ठापयति [स्म]। न च तावद् भक्तकृत्यमकार्षीत्। स त्रिरात्रभक्तच्छेदच्छिन्नो रत्नावत्या राजधान्या निष्क्रम्य येन भगवतो नखस्तूपस्तेनोपसंक्रम्योत्थितक एव तृतीयां[4] रात्रिन्दिवमतिनामयति [स्म]। स तस्या रात्र्या अत्ययेन चतुर्थे प्राग्भक्ते रत्नावतीं राजधानीं प्रविश्य नवनवतिप्राणिशतसहस्राण्यवैवर्तिक-बुद्धधर्मेषु प्रतिष्ठापयति[5]। स चतुर्दिवसभक्तच्छेदच्छिन्नो रत्नावत्या राजधान्या निष्क्रम्य येन भगवतो नखस्तूपस्तेनोपसंक्रम्योत्थितक एव[6] रात्रिन्दिवमतिनामयति [स्म]। स तस्या रात्र्या अत्ययेन पञ्चमे दिवसे रत्नावतीं राजधानीं प्रविश्य राज्ञोऽन्तःपुरं [प्राविशत्। प्रविश्य चाशीतिं स्त्रीसहस्राण्यवैवर्तिकत्वेऽनुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयति स्म। तस्माच्च नगरात्[7] सर्वसत्त्वानवैवर्तिकतायां स्थापयति

1 A & B स तस्यां रात्र्या अत्ययेन तृतीये प्राग् भक्ते

2 B नवनवती ; C प्रविश्य नवतीं

3 C ०वर्तिकानि बुद्ध०

4 A & B drop तृतीयां

5 A & B प्राणिकोटिनियुतशतसहस्राण्यवैवर्तिकत्वे स्थापयति स्म। अनुत्तरायां सम्यक् संबोधौ न च तावत्भक्तकृत्यमकार्षीत्।

6 B drops एव

7 A & B add अप्रमेयानसंख्येयान् सत्त्वाननुत्तरायां सम्यक्संबोधौ प्रतिष्ठापयति स्म। न च तावद् भक्तकृत्यं कृतवान्। स पञ्चरात्र भक्तच्छेदच्छिन्नो रत्नावत्या

बुद्धधर्मेषु[1]। स तस्या रात्र्या अत्ययेन षष्ठे प्रागभक्ते [रत्नावतीं राजधानीं] प्रविश्य सहस्रं राजपुत्राणामवैवर्तिकत्वे स्थापयति [स्म] अनुत्तरायां सम्यक्संबोधौ। न च तावद् भक्तस्य कृत्यं करोति [स्म]। स षष्ठे भक्तच्छेदच्छिन्नो [रत्नावत्या राजधान्या निष्क्रम्य] येन भगवतो नखस्तूपस्तेनोपसंक्रम्य रात्रिन्दिवमतिनामयति [स्म]। स तस्या रात्र्या अत्ययेन सप्तमे पुरोभक्ते रत्नावतीं राजधानीं [2]प्रविश्याद्राक्षीच्छूरदत्तं राजानमुद्यानमभिनिष्क्रमन्तं[3] सुवर्णमयेन रथेन रूप्यमयैः[4] पक्षभि[5]रुरगसारचन्दनमय्या ईषया वैदूर्यमयैश्चक्रैः उच्छ्रितच्छत्रध्वज[6]समलङ्कृतेन[7] ईषापट्टावनद्धेन[8] दूष्यपट्टसंच्छादितेन। यत्राष्टौ शतानि कुमारीणां [9]रत्नसूत्रपरिगृहीतानाम्। यास्तं रथं वाहयन्ति[10] अभिरूपाः प्रासादिका दर्शनीयाः परम[या] शुभवर्णपुष्कलतया समन्वागताः प्रीतिकार्ये ओह्लिल्यकार्ये बालानां न पण्डितानां चतुरशीतिक्षत्रियमहासालकुलसहस्राणि[11]

निष्क्राम्य येन भगवतो नखस्तूपस्तेनोपसंक्रम्योत्थितक एव रात्रिन्दिवमतिनामयति स्म।

1 A & B drop सर्वसत्त्वानवैवर्तिकतायां स्थापयति बुद्धधर्मेषु

2 A & B प्राविशत् सोद्राक्षी० 3 A & B ०नभूमिमभिनि०

4 C रथेन सुवर्णमयैः रथैः सुवर्ण०

5 B त्वदभ ; C पद्म ; Tib.208b, l. 1: དངོས |

6 A & B add पताका

7 A & B add रत्नवृत्त विचित्रेण 8 A & B ०वद्धेन

9 A रथसूत्र० 10 A ०न्ति स्म

11 A drops कुल०

पृष्ठतः समनुबद्धान्यभूवन्। चतुरशीतिब्राह्मणमहासालसहस्राणि चतुरशीतिगृहपतिमहासालसहस्राणि[1] पृष्ठतः पृष्ठतोऽनुबद्धान्यभूवन्[2]। पञ्च[3] च दुहितृशतानि रत्नमयीशिविकाभिरूढाः पुरतो निर्यान्ति स्म[4]। ताः सहदर्शनेनैव तस्य भिक्षोरवैवर्तिका अभूवन्ननुत्तरायां सम्यक्संबोधौ। अष्टषष्टिश्चान्तःपुरिकाशतसहस्राणि सहदर्शनेनैव तस्य भिक्षोरवैवर्तिकान्यभूवन्ननुत्तरायां सम्यक्संबोधौ। स च महाजनकायो मणिकुण्डलान्यपनीय पादुकाश्चापनीय[5] एकांसं चीवरं प्रावृत्य दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन स भिक्षुस्तेनाञ्जलिं प्रणम्य नमस्यमानः स्थितोऽभूत्। अथ खलु ता अपि कुमार्यः[6] पूर्वकैः कुशलमूलैः संचोदिताः समानास्ताभ्यः शिविकाभ्योऽवतरित्वा[7] एकांसं चीवरं प्रावृत्य दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य येन स भिक्षुस्तेनाञ्जलिं प्रणम्य गाथाभिरध्यभाषन्त[8]।

अवभासितमद्येवं रविणेव[9] समन्ततः।
भिक्षुणा प्रविशन्तेन जनकायश्च धिष्ठितः[10] ॥१५॥

1 B drops सहस्राणि चतुरशीतिं गृहपतिमहासालसहस्राणि ; B पृष्ठतः समनु०
2 B adds चतुरशीतिगृहपतिमहासहस्राणि पृष्ठत पृष्ठतः समनुवद्धान्यभूवन्।
3 A & B पञ्च राज्ञो दुहितृ०
4 A शिविका अभिरूढा पुरतो निर्याति स्म
5 C ०न्यपनीय पादुकानि चान्यपनीय
6 B कुमारीः
7 A & B अवतारित्वा मणिकुण्डलान्यपनीय पादुकानि चापनीय एकांसानि चीवराणि प्रावृत्य दक्षिणानि जानुमण्डलानि
8 B गाथाभिरध्यभाषत ; C adds स्म
9 A भासिदमद्य दुरविणे ; B रविशेषव
10 A जनकायोधिष्ठितः ; C विष्ठितः

रागदोषाः समुच्छिन्ना मोहाश्च विधमीकृताः ।
क्रोधो दोषश्च ईर्ष्या च सर्वं छिन्नं तदन्तरम्[1] ॥१६॥
न राजं[2] प्रेक्षते कश्चिन्न चैवमनुयात्यसौ ।
यो राज्ञः शूरदत्तस्य परिवारः सुतादिकः ॥१७॥
पूर्णमास्यां यथा चन्द्रो नक्षत्र[3]परिवारितः ।
एवं स शोभते भिक्षू राजपुत्रपुरस्कृतः ॥१८॥
स्वर्णबिम्बं यथा चित्रं कुशलेभिः सुचित्रितम् ।
पुष्पितः सालराजो वा एमेव[4] भिक्षु शोभते ॥१९॥
शक्रश्च[5] देवेन्द्र महानुभावः
सहस्रनेत्राधिपतिः पुरन्दरः[6] ।
सुमेरुमूर्ध्नि त्रिदशान ईश्वरो[7]
एमेव[4] भिक्षुः प्रविशातु[8] शोभतेऽयम्[9] ॥२०॥
ब्रह्मेव मन्ये[10] प्रतिष्ठितु ब्रह्मलोके[11]
सुनिर्मितो वाधिपति देवपुत्रः ।
सुयामु देवो यथरिव कामधातौ
एमेव[4] भिक्षुः प्रविशातु[12] शोभतेऽयम् ॥२१॥

1 A & B ईर्ष्या मानं च तुष्टा च सर्वे छिन्नदन्नदन्तर
2 A & B राज
3 A नक्षत्रैः
4 A एवमेव
5 B शक्रो च
6 C ०र्भुजङ्गमः
7 A त्रिदशेश्वरो वा
8 A & B प्रविशन्तु
9 B drops यम् ; C यत्
10 A मन्यः
11 A बोधिसत्त्व
12 A प्रविशन्तु शोभते ; B drops this stanza.

सूर्यो वा मन्ये[1] प्रतपति अन्तरीक्षे
सहस्ररश्मिर्विधमिय[2] अन्धकारम् ।
ओभासयन्तो समुदिशता समन्ताद्
एमेव भिक्षुः प्रविशतु शोभतेऽयम् ॥२२॥

दानं ददित्वा सुविपुल नन्तकल्पान्
रक्षित्व शीलं अशबलु नित्यकालम् ।
भावेत्व क्षान्ति[3]मसदृश सर्वलोके
सो लक्षणेभिः[4] परिवृतु एव शोभी ॥२३॥

जनयित्व वीर्यं अरियजनप्रशस्तं[5]
सेवित्व ध्याना[6] चतुरि अलीनचित्तः ।
उत्पाद्य प्रज्ञां निहनिय[7] क्लेशजालं
तेनैष भिक्षुः प्रतपति सर्वलोके ॥२४॥

ये बुद्धवीरा असदृशसत्त्वसाराः
समतीतशूरा विकिरिय धर्मश्रेष्ठान्[8] ।

1 A अन्ये ; B सूर्यो व अन्ये ; Tib. 209b, l. 3-4:
ཉི་མ་བཞིན་དུ་བར་སྣང་ལྷན་ནེར་བགྱིས །
འོད་ཟེར་སྟོང་ལྡན་མུན་ནག་རབ་དུ་སེལ །
ཕྱོགས་རྣམས་ཀུན་དུ་སྣང་བར་བགྱིད་པ་ལྟར །
དེ་བཞིན་དགེ་སློང་བྲོན་པ་མཛེས་པར་གྱུར །

2 B विसिर्य ; C विधसिय

3 C ज्ञान्ती०

4 A & B ०णेभी

5 A अरियंजन० ; B अरियज्ञगणप्रस्त

6 A ध्यानंश्चतुरि ; B ध्यानश्चतुरि

7 B निहनि

8 B विधरीय धर्मश्रेष्ठाः

येऽनागतेऽध्व तथरिव प्रत्युतूपन्ने
तेनैष[1] पुत्रो वशगानु धर्मराज्ञः[2] ॥२५॥
मा[3] ते अनित्यं भवतु[4] कदाचि भिक्षो
यद् रूपतैवं प्रतपसि सर्वलोके ।
संपश्य तेजो सुरुचिर शब्दघोषो[5]
राजान तेजो[6] न तपति सुष्ठु भूयः[7] ॥२६॥
धर्मो यथायं अधिगन्तु आत्मना ते
बुद्धानुज्ञातो विचरसि[8] सर्वलोके ।

1 B तेनैषु

2 A drops from विक्रिरिय to धर्मराज्ञः ; B बोधिराजा ; C वशग॰ तु धर्मराज ; Tib. 209b, l. 7:

སངས་རྒྱས་བསྟན་པ་མཚུངས་མེད་སེམས་ཅན་སྙིང་པོ་སྟེ །
དཔའ་པོ་འདས་པས་ཆོས་མཆོག་དག་ཀྱང་རབ་ཏུ་བཤད །
མ་འོངས་དུས་དང་དེ་བཞིན་ད་ལྟར་བྱུང་བ་ཡི །
ཆོས་ཀྱི་རྒྱལ་པོ་དབང་བརྙེས་རྣམས་ཀྱི་སྲས་དེ་ལགས །

3 A drops from मा ते अनित्य॰ to सुरुचिर

4 C भवति

5 A बोधिशब्दघोषा ; B ॰घोष

6 A drops ॰न तेजो ; B राजान राज तेजो

7 Tib. 210a, l. 1:

དགེ་སློང་ཁྱོད་ནི་མི་རྟག་ནམ་ཡང་མ་གྱུར་ཅིག །
གཟུགས་ནི་འདི་ལྟར་འཇིག་རྟེན་ཀུན་ན་རབ་ཏུ་ལྷན །
གཟི་བརྗིད་ཆེ་ཞིང་དབྱངས་སྙན་ཤིན་ཏུ་སྙན་པར་གདའ །
རྒྱལ་པོའི་གཟི་བརྗིད་ཤིན་ཏུ་ལྷམ་མེ་སྣང་མི་བགྱིད །

8 C विचरति

एमेव सर्वे विजहिय इस्त्रिभावं
सर्वेऽपि यामो यथरिव एष भिक्षुः ॥२७॥
त अञ्जलीयो दशनख कृत्व[1] सर्वे
भाषित्व गाथाः क्षिपिंसु पिलन्धनानि[2] ।
सोवर्णमाला तथपि च मुक्तहारा[3]-
नवतंसकानी[4] तथपि च कर्णनिष्कान्[5] ॥२८॥
राजा वै यथ चक्रवर्ति बलवान् सर्वान् विपश्यी मही
पुत्रसंज्ञ उपस्थपेति विचरन् द्वीपानि चत्वारि मे[6] ।
श्रेष्ठी क्षत्रिय ब्राह्मणां गृहपती ये कोट्टराजा[7] स्वका-
नो तेषामतिरेकु स्नेह जनयी सर्वेषु[8] प्रेमं स[मम्]॥२९॥
एवं शिक्षित[9] धारणी वशगतो भिक्षू अयं सूरतो
बोध्यङ्गा बल इन्द्रियान् विभजती[10] मार्गं च अष्टाङ्गिकम्
चन्द्रो वा यथ रात्रिये प्रतपति तारागणैर्मध्यगो[11]
सूर्यश्चो[12] यथ मण्डलं प्रतपते[13] वैरोचनस्तेजवान् ॥३०
सर्वान् बुद्धान्नमस्यामो दशबलाञ्छान्तेन्द्रियान् सूरतान्
येषां वर्णनु कश्चिदुत्सहि नरो कल्पाशतैः क्षेपितुम् ।

1 C क्रित्व ; B नखन कृत्व
2 A त्तिपिनुसुपि निबन्धनानि ; B गाथां त्तिपिंसु नत्वनानि ; C पिनिन्दनानि
3 A & B सौवर्णमालां बहुविधरत्नहारां
4 C ०नवररयनानी
5 C कण्ठपिलन्धनानि
6 A विचरन् चत्वारि द्वीपानि
7 A राजाः
8 A & B सर्वेष
9 B शिक्षितु
10 A विजयते ; B विभजति ; C विजयती ; Tib. རྣམ་པར་འབྱེད ।
11 A तारागणे मध्यगः
12 B सूर्यश्च
13 A & B यत मण्डली उदयते

कल्पा[1]कोटिसहस्र भाषितु बहून् नो चेद् गुणा क्षेपितुं[2]
नो चो वर्ण क्षिपेय[3] लोकप्रवरे एकस्य रोमस्य हि[4] ॥३१॥
येनो चक्र प्रवर्तितं असदृशं ज्ञानोपदं देशितं[5]
निपुणं धर्म प्रभाषितस्य विरजं[6] नो चास्य दृश्यं क्वचित्[7] ।
श्रमणा ब्राह्मण[8] देवनाग [असुरैर्मारैः सब्रह्मादिभि-
र्नो शक्तो गुण आर्णवः प्रकथितुं बुद्धस्य सर्वज्ञिनः[9]] ॥३२॥
वन्दामो जिनवैद्यराजुमसमं यस्येदृशा औरसाः
भाषित्वा इमि गाथ सर्वि मुदिता राज्ञः कुमार्यस्तदा[10]
स्वर्ण[11] काञ्चनचूर्णकांश्च प्रकिरी[12] चैलानि च प्रस्तरी ।
चूडानाञ्च मणीन् सहाररुचिरा कोटीशतामूल्लिका[13]
तं भिक्षुम् अभिछादयित्व मुदिता बोधाय संप्रस्थिताः ॥३३॥

1 A drops ०कोटि० ; B कल्पकोटि०
2 A बहूनो वा गुणु क्षेपेणो ; B नो चो गुणै क्षेपणो
3 A वा वर्ण क्षेपेय ; B क्षेपेतु ; 4 B ०स्यापि
5 B ज्ञानोपदेशितं 6 B प्रकाशितस्य विरजा
7 Tib. 210b, l. 4-5:
ཞིབ་ཅིང་རྡུལ་བྲལ་ཆོས་རྣམས་བཤད་པ་མཛད། །
དེ་ནི་གང་ནའང་སྣང་བར་འགྱུར་བ་མེད། །
8 A श्रामण्यैर्ब्राह्मण ; B श्रमणो ब्राह्मण 9 A adds ब्रह्मेण वा
10 A ०स्तथा 11 A & B सुवर्ण 12 B प्रकरी
13 A & B add :—चूडैश्चापि मणीभिर्हाररुचिरैः कोटीशतामूलीकैः
मन्दारैः सुगन्धनिचयैः पुष्पैस्तथा चन्दनैः
फुल्लैर्वार्षिकैर्मनोरमगुणैः पद्मैः प्रफुल्लैस्तथा
रत्नैचाग्रहता प्रभासरुचिरैर्नानाप्रकारैर्वरैः
Variant readings in B : मान्दारवैः कुसुमैः सुगन्धिनिचयैः पुष्पैस्तथा चम्पकैः

अथ खलु राज्ञः शूरदत्तस्यैतदभवत् । विप्रतिपन्नं वतेद-मन्तःपुरं जनकायश्च व्युत्थितः । स च जनो[1] मणिकुण्डलान्यप-नीय[2] एकांसं चीवरमावृत्य दक्षिणं जानुमण्डलं पृथिव्यां प्रति-ष्ठाप्य[3] येन स भिक्षुस्तेनाञ्जलिं प्रणम्य नमस्यति [स्म] । स च राजा शूरदत्तस्ता[वत् प्रासादिकोऽ]भूत् तावद्दर्शनीयो न च[4] तावदभिरूपो यावदभिरूपः स भिक्षुः । स राज्यहेतोरुत्त्रस्तोऽभूत् । रूपकायपरिनिष्पत्तिं [च] तस्य भिक्षोर्दृष्ट्वा अतीव रोषमकार्षीत् । तस्य च भिक्षो राजमार्गस्थस्य[5] राज्ञश्चक्षुर्भ्यां प्रविष्टः[6] । तस्यै-तदभवत् । संयुक्तचित्तेनैतेन भिक्षुणा ममान्तःपुरं दृष्टम् । अक्षिभ्यां चानेन सङ्केतः कृतः । तस्यैतदभ[वत् ।] क इदानी-मिमं भिक्षुं[7] जीविताद् व्यवरोपयिष्यतीति । अथ राज्ञः

Tib. 210b, l. 7-211a, l. 1:

གསེར་དང་གསེར་གྱི་དག་ཀྱང་འཕྲོར་བར་བྱེད །
གོས་རྣམས་ཀྱང་ནི་རབ་ཏུ་འདིང་བར་བྱེད །
གཙུག་གི་ནོར་བུ་དོ་ཤལ་མཛེས་པ་དག །
རིན་ཐང་བྲེ་བ་ཕྲག་ནི་བརྒྱ་རི་བས །
དགེ་སློང་དེ་ལ་མཆོད་པར་གཡོགས་ནས་ནི །
དགའ་ནས་བྱང་ཆུབ་ཕྱིར་ཡང་རབ་ཏུ་ཞུགས །

1 A drops जनो

2 A adds पादुकाश्चापनीय

3 A प्रतिष्ठाय

4 A drops च ; B ॰दभूत् न च तावद्दर्शनीयः । न ता॰

5 A मार्गस्थितस्य च ; B ॰मार्गस्थरयश्च॰

6 A राजश्चक्षुषोः प्रविष्टं ; B प्रविष्टं

7 A & B इदानीमेतं भिक्षुं ; C ॰मिमं न भिक्षुं

शूरदत्तस्य पृष्ठतः पुत्रसहस्र[1]मनुबद्धमभूत् । स तानामन्त्रयति[2] [स्म] । व्यवरोपयध्वं कुमारा एतं भिक्षुं जीवितादिति ।

अथ खलु ते[3] कुमारा राज्ञः शूरदत्तस्य प्रतिवहन्ति स्म[4] । तस्य भिक्षोः कृतशः[5] । तस्यैतदभवत् । पुत्रा अपि मे आज्ञां न कुर्वन्ति । एक एवाहं स्थापितः अद्वितीयः । [क] इदानीमिमं[6] भिक्षुं जीविताद्व्यवरोपयिष्यति । अथ राज्ञः शूरदत्तस्य नन्दिको नाम[7] वध्यघातकोऽभूत् चण्डः साहसिको रौद्रः[8] । अथ राजा[9] शूरदत्तस्तुष्ट उदग्रः आत्तमनाः[10] [एवं चिन्तयामास] अयं नन्दिक एतं भिक्षुं जीविताद् व्यवरोपयिष्यति । अथ खलु नन्दिको वध्यघातको येन राजा शूरदत्तस्तेनोपसंक्रामत्[11] । अथ खलु[12] राजा शूरदत्तस्तमाह[13] । शक्ष्यसि त्वं नन्दिक एतं भिक्षुं जीविताद् व्यवरोपयितुम् । महान्तं तेऽभिच्छादं[14] दास्यामि । नन्दिक आह । सुष्ठु देव यथाज्ञापयसि अथैनं भिक्षुं

1 A पुत्रशतस०
2 A स पुत्राना० ; B स तानामन्त्रय वेदिते
3 A drops ते
4 Tib. 211b, l. 1 : སླར་ཟློག་གོ །
5 Tib. Ibid. སྐམ་དུ་སེམས་ཏེ །
6 A & B ०मेतं
7 B drops नाम
8 A adds शूरदत्तस्य नातिदूरे स्थितोऽभूत् ; B साहस रोद्रः
9 A स तं दृष्ट्वा ; B स राजमार्गं
10 A adds प्रमुदितः प्रीतिसौमनस्यजातः एवं चिन्तयामास ।
11 A ०संक्रान्तः ; B drops 3 lines from अथ राजा up to संक्रामत् ।
12 A drops खलु ; B drops अथ खलु
13 A स्तं नन्दिकमेवमाह ; B राज्ञः सूरदत्तस्तं नन्दिकमेवमाह
14 A महान्तं निच्छादं प्रदास्यामि इति ।

जीविताद् व्यवरोपयिष्यामि[1]। तेन हि नन्दिक यस्येदानीं कालं मन्यसे। तीक्ष्णमसिं गृहीत्वा एतं भिक्षोर्हस्तपादं[2] छिन्द कर्णनासां[3] छिन्द। अनेन मे संरक्तचित्तेनान्तःपुरं प्रेक्षितमतोऽस्य [4]सन्दंशेनाक्षिणी उत्पाटय। अथ नन्दिकेन वध्यघातकेन[5] तस्यामेव वेलायां तीक्ष्णमसिं[6] गृहीत्वा तस्य भिक्षोर्हस्तपादाश्छिन्ना[7] अक्षिणी चोत्पाटिते[8]। ततोऽसौ महान् जनकायो रुदन् क्रन्दन् परिदेवमानः पुनरपि रत्नावतीं राजधानीं प्रविष्टः।

अथ [खलु] राजा शूरदत्तः सप्ताहस्यात्ययादुद्यान[9]गतो [न रमते] न क्रीडति न परिचारयति। स उद्यानान्निवृत्तः सप्ताहस्यात्ययेन[10] रत्नावतीं राजधानीं प्राविशत्। सोऽद्राक्षीत्तं भिक्षुं राजमार्गे छोरितं[11] सप्ताहमृतकम्[12] अविवर्ण-

1 A & B ०ताद्व्यवरोपयामि। राजाह। एतस्य
2 A & B ०पादां
3 A ०नासे ; B नासो
4 B सन्दसेनाक्षिण्युत्० ; A & C सन्दर्शनमक्षिणी ; Tib. 212a, l. 1: སྐམ་པས།
5 A & C वध्यघातेन
6 A तीक्ष्णं शस्त्रं
7 A भिक्षोः शिरःकर्णनासाहस्तपादा
8 A & B ०पाटिते। अथ खलु तस्य भिक्षोः शिरःकर्णनासाकरचरणनयनेषु छिद्यमानेषु अनेकानि रश्मिकोटीनियुतशतसहस्राणि निश्चरित्वा अनेकानि च क्षीरधाराणि दशदिशो चाहिण्ड्य पुनरेव तस्य भिक्षोः कायेऽन्तर्हितान्यभूवन्। छेदे श्रीवत्सस्वस्तिकवज्राद्याश्चान्तर्गताः द्वात्रिंशन्महापुरुषलक्षणानि संदृश्यन्ते स्म। अथ खलु महान् जनकाय इत्यागच्छमानस्ततोऽसौ महाजनकायस्तं भिक्षुं राजमार्गे छिन्नं दृष्ट्वा दुःखितो दुर्मना आश्चर्यप्राप्तश्च रोदन् क्रन्दन् परिदेवमानः पुनरपि तां रत्नावतीं राजधानीं प्रविष्टोऽभूत्।
9 A & B ०द्यानवर गतो ; A न रमते स्म न क्रीडते स्म न परिचारयति स्म।
10 A ०स्यात्यये
11 A छ्छारितकं
12 A ०मृतम्

शरीरम् । तस्यैतदभूत् । यथायं भिक्षुरविवर्णशरीरो [निःसंशयमेष[1]] भिक्षुरवैवर्तिको भविष्यत्यनुत्तरायां सम्यक्संबोधौ । पापं मया कर्म कृतं महानरकसंव[र्तनीयं] क्षिप्रमेव [मया महानिरये] प्रतिपत्तव्यं भविष्यति । तस्यैवं चिन्तयतः उपर्यन्तरीक्षे चतुरशीतिभिर्देवपुत्रसहस्रैरेकरुतस्वरघोषशब्द[मुदी]रितम्[2] । ए[वमे]तन्महाराज[3] यथा वदसि । अवैवर्तिक एष भिक्षुरनुत्तरायां सम्यक्संबोधौ । तस्य तावद्[4] भूयस्या मात्रया भयं च त्रासं च स्तम्भितत्वं च[5] रोमहर्षश्चोत्पन्नो विप्रतिसारश्चाभूत् । अथ राजा शूरदत्तो दुःखितो दुर्मना विप्रतिसारी तस्यां वेलायामिमा गाथा अभाषत[6] ।

राज्यं त्यजिष्ये तथ[पि च] राजधानीं
हिरण्यसुवर्णं[7] [तथ] मणिमुक्तरत्नान्[8] ।
घातेयमात्मा[9] स्वय शस्त्र[10] गृह्य
निह्री[नकर्मास्मि]ह बालबुद्धिः ॥३४॥
सुपुष्पचन्द्रोऽयमिह[11] भिक्षुरासीद्
द्वात्रिंशता कवचितु लक्षणेभिः ।

1 B निसंशयेन एष

2 A & B ०रेकस्वररुतरवितशब्द०

3 A & B ०जैवमेतद्

4 A & B drop तावद् and add अन्तरीक्षे देवताशब्दं श्रुत्वा

5 A ससंभीतं

6 A & B वेलायां महाक्रन्दमकार्षीत् एवमाह ।

7 B ०सुवर्णं चन्द्रो अयमिह

8 A & B रत्नं

9 A & B घातेय्य आत्मा

10 A स्वयं सुद्ध शास्त्रं ; B स्वय हस्तस्थं

11 B अयमिह ; C स पुष्यचन्द्रो इहमिम

ओभासयन्तो प्रविशति राजधानीं
नक्षत्रराजो यथरिव पूर्णमास्याम्[1] ॥३५॥
अहं च हीन प्रलुडितु[2] कामभोगे
[3]नारीगणेना प्रमुदितु निष्क्रमामि ।
रथाभिरूढः परिवृतु क्षत्रियेभिः
अयं च एती सु[रभि सु]नेत्र भिक्षुः ॥३६॥
तं दृष्टु[4] भिक्षुं प्रमुदितु नारिसङ्घो[5]
[सौ]वर्णुमालानवसिरि प्रेमजाता[6] ।
सर्वे गृहीत्वा दशनखु अञ्जलीयो
गाथाभिगीतैस्तमभिस्तविंसु भिक्षुम् ॥३७॥
ते गीतशब्दाः प्रशमित सर्वि राज्ञः
स रथाभिरू[ढः] परिवृतु क्षत्रियेभिः ।
अयं च एती सुरभि सुनेत्रो भिक्षु-
र्महानुभाव सुगतवरस्य पुत्रः ॥३८॥
मम चैव[7] चित्तं परम निहीनुमासी-
दीर्ष्यां च क्रोधं च तत्र[8] जनेमि मूढः ।

1 A पूर्णमास्याः ; C यथ परिपूर्ण० 2 B प्रलङ्कित

3 B drops नारीगणे ; A & B ०ना प्रमुदितु निष्क्रमाणि ; C गणेना परिवृत्तु : see Tib 213a, l. 1.

4 B दृष्ट्वा 5 B संघः

6 A जाताः ; B ०जात ; C दाता

7 A ममैव ; C चैतु

8 A कोप तु तत्र ; B ईर्षा च क्रोधं तत्र

मुदितं विदित्व सुविपुल नारिसङ्घो[1]
आलोक्य[2] भिक्षुं [3]प्रविशतु राजधानिम्[4] ॥३९॥
अतिघोररूपा अहु[5] गिर भाषि
तव पुत्रसहस्रं भणमि तत् क्षणस्मिन् ।
गत्वान[6] भिक्षुं प्रकुरुत खण्डखण्डा[7]-
मेषो[8] हि मह्यं परम अमित्र घोरः[9] ॥४०॥
ते कुमार सर्वे परम सुशीलवन्तो[10]
स्वहितैषिचित्ता[11] अभिरत येन भिक्षुः ।

1 A & B ०संघं 2 A प्रेक्षन्ति ; B पक्षन्ति

3 A प्रविशत राजधानी ; B प्रविशति राजधानीः

4 A adds अोभासितेनाचतुर्दिशता समन्ताच्चान्द्रेण वा राहुविमुक्तिशोभिना ।
प्रामोदयन्ते प्रमुदितु नारिसंघा तमालोक्य भिक्षुं प्रविशत राजधानिम् ॥
Variant readings in B: ... ... शोभिता ।
दयन्तो प्रमुदितु नारिसंघा आलोक्य भिक्षुं प्रविशत राजधानिम् ॥
Tib. 213a l. 7 follows A & B.

5 A & B आह ; C बहु 6 A गृहाण

7 A खण्डखण्ड ; B खण्डखण्डं ; C repeats here the four lines from आलोक्य to खण्डा

8 A & B एषो

9 A परम अरिघोररूपः ; Tib. 213b, l. 1 : འདི་ནི་ང་ཡི་དགྲ་མཆོག་མ་རུངས་པ །

10 A सर्वे सुमधुर० ; B ते कुमारा सर्वे सुमधुरशील० ; Tib. 213b, l. 2:
གཞོན་ནུ་ཐམས་ཅད་མཛེན་ཞིང་ཚུལ་ལྡན་དེ །

11 A ०स्ते हि ; B स्वहितैर्षिचित्ता ; Tib. 213b, l. 2:
བདག་ལ་ཕན་སེམས །

आणंति[1] देवा[न्न] करिय एवरूपा[2]

शोकाभिभूतो अहमभु तस्मि काले ॥४१॥

इमु भिक्षु दृष्ट्वा परम सुशीलवन्तं

मैत्र्या उपेतं[3] पितरमिव प्रवृत्तम् ।

सुदुष्टुचित्तो अवसिरि घातनार्थं[4]

[पतितो] अवीचौ अहु [प]श्च[5] काले ॥४२॥

यन्नन्दिकोऽयं इह स्थितु राजमार्गे

अतिरौद्रकर्मा दुःख[6]करु मानुषाणाम् ।

आणंति[7] तेना मम कृत एवरूपा[8]

मालागुणो वा अयमिह च्छिन्न भिक्षुः ॥४३॥

समन्तभद्रे वनवरि प्रेमणीये

द्विजाभिकीर्णे कुसुमित[9]मञ्जुगन्धे ।

सो चापि अन्यः सुविपुल भिक्षुसङ्घो

माला विहीनो यथरिव एकपुत्रकः[10] ॥४४॥

उत्तिष्ठ भिक्षो प्रतिवस काननस्मिन्

कृतो ते अर्थः सुविपुल मानुषाणाम् ।

1 A आमन्ति

2 A & B करिम एवरूपां ; Tib. 213b, l. 2:

རྒྱལ་པོ་འདི་འདྲའི་བཀར་བཞིན་བགྱིར་མི་རུང །

3 A & B उपेतां

4 B सुदूष्टचित्तो अवशिरि घाटनार्थं

5 B पतितौ अविचौ तपि अहु पश्च ; C ० चौ तपिष्यहु पश्च

6 A द्रुग्ध०

7 A आनर्त्तिं ; B आनन्दि

8 A ०रूपो

9 A ०मितु

10 A & B एकपुत्रः

यद्राजधानीमिमु तद आगतोऽसि[1]

एष्यन्ति भिक्षु सुकरुण क्रन्दमानाः ॥४५॥

पुष्पध्वजानि इम कृत[2]दक्षिणेना

वामेन अन्ये सुरुचिरदर्शनीयाः ।

प्रज्ञप्तमार्गः स्फुटकृत चीवरेभि[3]

उत्तिष्ठ भिक्षो[4] प्रतिभण[5] धर्मश्रेष्ठम्[6] ॥४६॥

चिर प्रविष्टो[7] तुहु इह[8] राजधान्या-

मेष्यन्ति भिक्षु सुकरुणु क[न्द]मानाः ।

मा अन्तरायो भव सिय जीवितस्य[9]

[प्रलोपकाले] जिनवर[शासन]स्मिन् ॥४७॥

1 A & B ०मिमु तनु आ० ; C आगतोऽस्मि

2 A & B ०नी इमु कृतु

3 A ०टु कृतु चीवरेभी ; B ०टु कृतु चीवरेही

4 A भिक्षोः ; B भिक्षुः

5 B प्रतिभेण

6 Tib. 213b, l. 7-214a, l. 1:

ལག་པ་གཡས་པས་མེ་ཏོག་རྒྱལ་མཚན་ཐོགས། །

གཡོན་པ་ཡིས་ཀྱང་བསྟུ་སྡུག་མཛེས་པ་གཞན། །

ལམ་ཡང་སྤྲངས་ཤིང་གོས་ཀྱིས་ཁེབས་པར་གཡོགས། །

དགེ་སློང་བཞེངས་ལ་ཆོས་མཆོག་བཤད་པ་མཛོད། །

7 A ०ष्टा

8 A & B इह तुहु

9 Tib. 214a, l. 2: ཁྱོད་ཀྱི་སྲོག་གི་བར་ཆད་འགྱུར་དུ་དོགས། །

यथै[व कश्चित्] पुरुष महानुभावो
दिक्षु [विदिक्षु] सततु विघुष्टशब्दः ।
महाप्रपातं प्रपतति वसुन्धरायां
सर्वाभिभूय [त्रि]भवमिमं[1] समन्तात्[2] ॥४८॥
[एमेव भिक्षुरिह पतितो धरण्यां
सुरूपरूपो भूषितु लक्षणैर्वरैः ।
अदोषदुष्टो मय कृत पापबुद्धिना
सुपुष्पचन्द्रो तिष्ठति खण्डखण्डः ॥४९॥]
[भिक्षु इहो दुःखहत सर्व एव[3]
अप्रीति [4]जातास्तथपि [च] शल्यचित्ताः[5] ।

1 A सर्वाभिभूय विमिमं ; B सर्वाभिभूय त्रिभविमि; C सर्वाभिपथ

2 Tib. 214a, l. 3:

སྲིད་གསུམ་འདི་ཀུན་ཐམས་ཅད་ཟིལ་མནན་ནས །
གཡང་ས་ཆེན་པོར་མཚོངས་ཏེ་སར་ལྷུང་ལྟར །

3 A ते द्रग्धहत शल्य सर्वे ; B एमेव ते दुःखहत शल्य सर्वे

4 A & B अप्रीति जाताश्रुतिरिव कल्पताश्च

5 C एमेव ते शल्यदुःखहत सर्वमेते
प्रीतिश्च जाता अतिरिव शल्यता च ।
तस्यापि शोको श्रुणिय निरोक्षतो वा
उत्पन्न प्राप्त भविष्यति सर्वशोकः ॥

A & B & Tib. replace the above stanza of C by two stanzas nos. 49 & 50. A & B, however, retain the last two lines of C's reading thus:

तस्यापि शोको श्रुणिय निरीकृतो व ।
उन्मत्तप्राप्तो भविष्यति सर्वशोकः ॥

In the Tibetan version there is no mention of these two lines.

भेष्यन्ति क्षिप्रं दृष्ट्विमु धर्मभाणकं
सुपुष्पचन्द्रं हतु पतितं पृथिव्याम् ॥५०॥]
सुपुष्पचन्द्रो यथरिव शैलराजो
द्वात्रिंशतीभिः कवचितु लक्षणेभिः ।
मालागुणेव[1] प्रमदगणे[न] गृह्य
क्षणे विकीर्णं कृतु खण्डखण्डम्[2] ॥५१॥
कृतस्मि[3] कर्मं परम सुघोर[4]रूपम्
अवीचि ग[मि]ष्ये यमविषयमनाथो ।
बुद्धान भेष्ये परम सुदूरदूरे
स भिक्षुः कृतु इह खण्डखण्डम् ॥५२॥
न पुत्रत्राणं न पि[5] मम ज्ञातिसङ्घो[6]
नो चास्य मान्या न च भटपादमूलिकाः[7] ।
भेष्यन्ति त्राणं[8] नरकगतस्य मह्यं
स्वयं करित्व परम निहीन कर्म ॥५३॥
येऽतीत बुद्धास्तथपि च ये अनागता-
स्तिष्ठन्ति[9] ये चो दशसु दिशासु[10] केचित् ।

1 A & C ०गुणेवा
2 A कतु इह राजधान्याम् ; B कृतु इह राजधान्याः
3 C कृतं मि
4 C परमघोर०
5 A ०त्राणान्नपि
6 A & B ०संघा
7 A & B चापि माल्या न भटपादमूलिकाः ; Tib. 214b, l. 1 :
བློན་པོ་དང་ནི་ཞབས་འབྲིང་བཀུར་བ་ཡང །
8 A & B त्राणान्नरक०
9 A तिष्ठ'
10 A ये दशसु दिशासु ; C ये चो दशदिशासु

ते सार्थवाहा[1] दशबलनिष्किलेशाः[2]
शरणम् उपैमी वज्रघन आत्मभावान्[3] ॥५४॥
दृष्ट्वान भिक्षुं कृतु इह खण्डखण्डं
क्रोशः प्रमुक्तः सुकरुण देवताभिः ।
गत्वान ते आरोचयि भिक्षुसङ्घे[4]
सुपुष्पचन्द्रो हतु इह राजधान्याम्[5] ॥५५॥
योऽसौ[6] विदु पण्डितु धर्मभाणको
महानुभावो दिशिविदिशासु घुष्टः ।
सो बोधिसत्त्वो प्रतिष्ठितु धारणीये
सुपुष्पचन्द्रो हतु इह राजधान्याम्[5] ॥५६॥
यो देति दानं विविधमनन्तकल्पान्
यो शील रक्षत्य[श]बलमसंप्र[वे]धिम्[7] ।
यो भावि क्षान्तीमसदृश[8] सर्वलोके
सुपुष्पचन्द्रो हतु इह राजधान्याम्[5] ॥५७॥

1 A & B तां सार्थवाहां
2 A & B ०लेशां
3 A उपेमो वर जिन घनात्मभावां ; B घनाभावत् ; C विप्रमुक्ताः ; Tib. 214b, l. 3 :
ཪྡོ་རྗེ་སྟུག་པོ་སྐུ་མངའི་སྐྱབས་སུ་མཆི །
4 A गन्धान हिन्ते आरोचयति भिक्षुसंघ ; B गत्वान हिन्ते आरो०
5 B ०धान्याः
6 A यो सो
7 A & B रक्षत्यसर्वेलसंप्रवेधिं
8 A & B ०न्तिमसदृशु

[1]यो वीर्यवन्तः सततमनन्तकल्पान्
यो ध्यानु ध्यायी चतुरि[2] अलीनचित्तः।
यः प्रज्ञा भावेति[3] किलेशघातकी[4]
सुपुष्पचन्द्रो हतु[5] इह राजधानिये[6] ॥५८॥
यः कायप्रेमं विजहित्व सर्वशो-[7]
नपेक्ष[8]भूत्वा तथ जीवितातो[9]।
समन्तभद्राद्वनतोतरित्वा[10]
सुपुष्पचन्द्रो[11] हतु इह राजधानिये[12] ॥५९॥
ते राजधानीं प्रविशित्व सूरता
आर्तस्वरं क्रन्दिषु घोररूपम्।
दृष्ट्वान[13] भिक्षुं कृतु [इह] खण्डखण्डं
मूर्च्छित्व सर्वे प्रपतित [ते] धरण्याम् ॥६०॥
राजान तं[14] सो अवचिषु भिक्षुसङ्घो[15]
किमापराद्धं[16] तव देव भिक्षुणा।

1 A adds यो सो विदू पण्डितु धर्मभाणको ; B योऽसौ विदू पण्डितु धर्मभाण
2 C चतुरी
3 A विभावेति
4 B घाटकी ; C यावनी
5 C हत
6 A & B राजधान्यां
7 A प्रजहित्व ; B व्रजसित्व
8 A & B अनपेक्षि
9 A तथापि च जीविता ; B तथपि व जीविता वो
10 C °नतोत्तरित्वा
11 A °चन्द्रं वधितमनापराधिं
12 B adds आक्रन्द श्रुत्वा सकरुण देवतानां ते भिक्षु सर्वे परमदुःखभिभूताः। द्रष्टुं समग्राः पुन पूरि प्रविष्टा सुपुष्पचन्द्रं वधितमनापारधिम् ॥
13 B drops न
14 B राजानु तस्मा
15 A अवचिषु धर्मसंघो
16 C किमापराधं

अच्छिद्रशीलेन सुसंवृतेन
यः पूर्वजातीं स्मरते अचिन्तियाम्[1] ॥६१॥
एषो वशी [2]धारणिज्ञानपारगो
एष प्रजानातिह शून्य संस्कृतम् ।
एषोऽनिमित्तं जगतो निदर्शयी[3]
प्रणिधानसंज्ञां इति सर्व[4] वर्जयी[5] ॥६२॥
एषो मुंचि मनोज्ञघोषरुचिरं शान्तेन्द्रियः सूरतो
एषो पूर्वनिवास-पारमिगतो[6] लोकस्य अभ्युद्गतः ।
एषो बुद्ध स्वयंभु ज्ञानवृषभो लोकस्य[7] चित्रीकृतः
शुद्धा[8] चक्षुष प्रेक्षिषू वितिमिरो अत्यर्थ-मैत्री-कृपः[9] ॥६३॥

1 B ०जातीस्मर तेन यः पूर्वजाति स्मरते अचिन्तियाम् 2 A धारणी

3 A जगदोस्य देशयी ; B जगतोस्य देशयी ; C जगती निदर्शया ; Tib. 215a, l. 5: འདི་ནི་འགྲོ་བ་དག་ལ་མཚན་མེད་སྟོན། །

4 A & B इमु सर्वि 5 B वर्जयां

6 A निवासपारगमितो ; C निवासिपारमिगतो ; Tib. 215a, l. 6:
འདི་ཅི་སྔོན་གྱི་གནས་ཀྱི་ཕ་རོལ་ཕྱིན། །
འཇིག་རྟེན་ཐམས་ཅད་ལས་ཀྱང་མངོན་པར་འཕགས། །

7 A ०वृषभां लोकेन ; B लोकेन ; Tib. 215a, l. 7:
འདི་ནི་སངས་རྒྱས་རང་བྱུང་ཡེ་ཤེས་ཀྱིས། །
ཁྱུ་མཆོག་གྱུར་ཅིང་འཇིག་རྟེན་རི་མོར་བྱས། །
དག་ཅིང་རབ་རིབ་མེད་པའི་མིག་གིས་ལྟ། །
བྱམས་པ་དང་ནི་སྙིང་རྗེ་ཤིན་ཏུ་ཆེ། །

8 B मूर्द्धा ; C बुद्धा

9 B अभ्यर्थ मैत्रीकृतः ; C अन्यर्थ मैत्रीत्यह

कामा हीनजघन्य दुःखजननाः स्वर्गस्य निर्नाशकाः[1]
कामान् सेवतु भोन्ति [2]श्रोत्रविकलाः प्रज्ञाविहीना नराः ।
कामान् सेवतु अन्धु भोति मनुजो मातापितृङ्घातयी[3]
कामान् सेवतु शीलवन्तु वधयी तस्माद्विवर्जेन्नरो[4] ॥६४॥
कामान् सेवतु राज[5]पार्थिववरा वर्जेत्व ऋद्धिमिमां
घोरान् गच्छति कर्कशान्दुख[6]करान्नारकान् भयानन्तकान्[7] ।
पापं [कर्म] करोति[8] ईदृश विदु भिक्षुं वधेती[9] सदा
तस्मात् पापु विवर्जितव्यु विविधं यो इच्छि[10] बोधिं शिवाम् ॥६५॥

रूपाणि शब्दान् रस तथ गन्ध श्रेष्ठान्
स्प्रष्टव्य धर्मान् त्यजति[11] अलीनचित्तः ।

1 A & C निर्नाशकः ; Tib. 215b, l. 1:

འདོད་པ་ངན་ཅིང་གཅིག་ལ་སྡུག་བསྔལ་བསྐྱེད །
མཐོ་རིས་རྣམ་པར་མ་རུང་བྱེད་པ་སྟེ །
འདོད་པ་བསྟེན་ན་རྣ་བ་མེད་པར་འགྱུར །

2 B drops the words from श्रोत्र॰ to सेवतु

3 A कामां सेवितु भोन्ति अन्धु मनुजा मातापितृर्घातयी ; B घाटयो

4 A ॰द्विवर्जेन्नराः ; B ॰वन्तु वधसी तस्माद्विवर्जन्नरो ; C ॰वर्जोन्नरो

5 B राज्ञ ; Tib. 215b, l. 3:

ས་བདག་དམ་པ་འཁོར་པ་འདི་བོར་ནས །
མི་བཟད་སྡུག་བསྔལ་རྩུབ་བྱེད་སེམས་དམྱལ་ནས །
སེམས་ཅན་དམྱལ་བ་འཇིགས་པ་ཆེན་པོར་འགྲོ །

6 B दुःख॰ ; C दुखि॰

7 C ॰न्नरकान् मया नारकाः

8 B यं कर्म करोति ; C करोतु

9 B वधेति

10 A पाप विवर्जीतव्यु विविधा यो इच्छि

11 B धर्मास्तजती

कायं विदित्व यथरिव माय तुच्छं
चक्षु च श्रोत्रं तथरिव[1] घ्राण जिह्वाम्[2] ॥६६॥
दाने शिक्षितु[3] शीलि अप्रतिसमः क्षान्तिं च वीर्यं तथा
ध्यानं सेवतु [4]प्रज्ञपारमिगतः सत्त्वान अर्थंकरः।
लोकः सर्वु सदेवकः समनुजः प्रेक्षन्ति मैत्रया जिनं[5]
तेनो चक्षु महान्धकारगहने[6] बुध्यन्ति बोधिं शिवाम्[7] ॥६७॥
हस्ती[8] अश्वरथांस्त्यजन्ति मुदिता [9]अङ्गालमंचांस्तथा
शिविकां दोल्लिकयुग्ययानवृषभान्[10] ग्रामाणि राष्ट्राणि च।

1 A श्रोत्रां तथ च ; B तथापि च 2 B ०जिह्वाः
3 A & B शिक्षित्व 4 B ध्यानां सेव प्रज्ञा० 5 B जिनः
6 A चक्षुष अन्धकारगहने ; B तेनो चक्षुष अन्धकारगहनो ; C गहना
7 Tib. 215b, l. 7:

འཇིག་རྟེན་ལྷ་དང་མིར་བཅས་ཐམས་ཅད་ཀྱང་།
བྱམས་པས་རྒྱལ་བ་ལ་ནི་རབ་ཏུ་ལྟ།
དེ་ཕྱིར་མིག་ནི་མུན་ནག་གཉིས་བས་གྱུར་ཀྱང་།
བྱང་ཆུབ་ཞི་བཉིད་ནི་འཚང་རྒྱ་འགྱུར།

8 B & C हस्ति 9 B अर्कालगन्वग ; C इद्दल०
10 A & C ्सषभाम् ; Tib. 216a, ll. 1-3:

རྟ་དང་པལ་གླང་ཡང་ཤོགས་ཁྲི་རྣམས་དང་།
ཁྱོགས་དང་སྤྱས་རྣམས་ཀྱང་ནི་དེ་བཞིན་ཏེ།
གླང་པོ་དག་དང་བཞོན་དང་དགལ་བ་དང་།
གྲོང་དང་ཡུལ་འཁོར་དགའ་བ་གཏོང་བར་བྱེད།
གྲོང་ཁྱེར་དང་ནི་རྒྱལ་སྲིད་ཡོངས་གཏོང་ཞིང་།
གསེར་དང་དངུལ་དང་ཤེལ་དང་བྱུ་རུ་དང་།

नगर राज्य त्यजित्व[1] स्वर्णस्फटिकां रूप्यं प्रवाडांस्तथा[2]
भार्या-प्रियपुत्र-धीत-स्वशिरास्त्याजि[3] बोधिप्रस्थिताः ॥६८॥
पूजां चो अतुलां करोन्ति मुदिताः पुष्पेभि गन्धेभि चो[4]
गृह्य च्छत्रध्वजा पताक विविधा[5] संगीति-भाण्डानि[6] च ।
नो चापी[7] अभिनन्दिषु भवगतिं[8] ज्ञात्वान शून्यान् भवान्
तेनो लक्षणचित्रिता दशबला भाषन्ति सर्वा दिशः ॥६९॥
न कामधातौ न च [9]रूपधाता-
वारूप्यधातौ च न ते निविष्टाः ।
त्रैधातुकं नाभि[नि]विष्टधर्मा
ये बोधिसत्त्वाः प्रतिष्ठितु धारणीये ॥७०॥
नो आत्मसंज्ञा न च [पुन] सत्त्वसंज्ञा
नो[10] जीवसंज्ञा पुद्गलसंज्ञ[11] नापि
नित्यं चरन्ता[12] अशबलु ब्रह्मचर्यं
ये बोधिसत्त्वाः प्रतिष्ठितु धारणीये ॥७१॥

དེ་བཞིན་གནས་དང་བུ་དང་བུ་མོ་དང་།
རང་གི་མགོ་ཡང་གཏོང་ཞིང་བྱང་ཆུབ་ཞུགས།

1 A & B नगरां राज्य त्यजन्ति 2 B सुवर्णस्फटिकारूप्य प्रवाड़ाम् स्तथा
3 A भार्या आत्मजपुत्रधीत ; B भार्या आत्मपुत्रधीत स्वशिरास्त्यजित्वा ; C सशिरा त्यजित्वा 4 A च ; B पुष्पेहि गन्धेहि चो
5 A ०ध्वजपताकविविधां ; B ०ध्वजपताकाविविधां
6 B भण्डानि 7 A चाभी ; B चापि
8 A & B भगवतो 9 B रूप्य०
10 C न च जीवसंज्ञा 11 A & B संज्ञा
12 B ०न्ति

न भावसंज्ञा [न च पुनरभावसंज्ञा]
न क्षेमसंज्ञा न पुनरक्षेमसंज्ञा[1] ।
नो सौख्यसंज्ञा[2] न पुनरसौख्यसंज्ञा
ये बोधिसत्त्वाः प्रतिष्ठितु धारणीये ॥७२॥
नो अस्तिसंज्ञा न पुनर्नास्तिसंज्ञा
नो इस्त्रिसंज्ञा न पुनः पुरुषसंज्ञा ।
न ग्रामसंज्ञा[3] न च नगरेषु संज्ञा[4]
नो राष्ट्रसंज्ञा न पि निगमेषु संज्ञा ॥७३॥
नो रागसंज्ञा न पुन विरागसंज्ञा
नो दोषसंज्ञा न पुनरदोषसंज्ञा ।
नो मोहसंज्ञा न पुनरमोहसंज्ञा
ये बोधिसत्त्वाः प्रतिष्ठितु धारणीये[5] ॥७४॥
नो इन्द्रियेभिर्न [6]पुन ते बलेभि-
र्बोध्यङ्गध्याने न च पुन ते निविष्टाः[7] ।

1 B च न रक्षेमसंज्ञा
2 A नो संख्यसंज्ञा न पुनरसंख्यसंज्ञा ; B नो सख्यु न पुनरसंख्य संज्ञा
[तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमामन्त्रयते स्म ।] तस्मात्तर्हि कुमार मनःसंवरसंवृतो भविष्यामीत्येवं बोधिसत्त्वेन महासत्त्वेन शिक्षितव्यम् । तत्र कुमार कतमो मनःसंवरः । येन मनःसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वो वज्रोपमं समाधिं प्रतिलभते । अयमुच्यते [कुमार] मनःसंवरः । येन मनःसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वो ज्वलनान्तराभां[5] नाम रश्मिं प्रतिलभते । अयमुच्यते मनःसंवरः । येन[6]... महासत्त्वोऽष्टाङ्गोपेतस्वरघोषसंपदं प्र०[7] । अयमुच्यते मनःसंवरः । येन...महासत्त्वो द्वात्रिंशन्महापुरुषलक्षणानि प्र० । दशतथागतबलानि चत्वारि वैशारद्यानि चतस्रः प्रतिसंविदः अष्टादशावेणिकांश्च बुद्धधर्मान् प्र० । अयमुच्यते मनःसंवरः । येन... महासत्त्वः त्रीणि विमोक्षमुखानि प्र० । शून्यतामनिमित्तमप्रणिहितं विमोक्षमुखं प्र० । अयमुच्यते मनःसंवरः । येन...महासत्त्वश्चतुरो ब्रह्मविहारान् प्र० । महामैत्रीं महाकरुणां महामुदितां

1 A वापि 2 A ०ते सौ ; B च न सो सौ 3 A निवेखु

4 A & B add इति श्रीसमाधिराजे वाक्संवरपरिवर्तो नामोनचत्वारिंशतितमः ।

5 A ज्ञानोतरङ्ग

6 येन...महासत्त्वः=येन मनःसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः

7 प्र०=प्रतिलभते

महोपेक्षां प्र० । अयमुच्यते मनःसंवरः। येन...महासत्त्वश्चत्वारि स्मृत्युपस्थानानि प्र० । चत्वारि सम्यक् प्रहाणानि चतुर ऋद्धिपादान् पञ्चेन्द्रियाणि पञ्च बलानि सप्त बोध्यङ्गानि आर्याष्टाङ्गं मार्गं प्र० । अयमुच्यते मनःसंवरः। येन...महासत्त्वो महाकरुणाविहारं प्र० । महोपेक्षाविहारं प्र०[1] । क्षेमांश्च वितर्कान् प्र० । [प्रविवेकांश्च वितर्कान् प्र०] हितैषितां च ईर्यां च चर्यां च प्र० । अयमुच्यते मनःसंवरः ।

पुनरपरं कुमार मनःसंवर उच्यते। येन मनःसंवरेण समन्वागतो बोधिसत्त्वो महासत्त्वो मिथ्यादृष्टिप्रहाणाय मिथ्यादृष्ट्या सार्धं न संवसति। अभिध्याप्रहाणाय अनभिध्यालुर्भवति। व्यापादप्रहाणाय व्यापादेन सार्धं न संवसति। कौसीद्यप्रहाणाय कुसीदेन सार्धं न संवसति। गुरूणामन्तिके मातापित्रोराचार्याणां चान्तिके शाठ्यचित्तं नोत्पादयति। रागद्वेषमोहचित्तं नोत्पादयति। न च तैः सार्धं संवसति। बोधिचित्तं नोत्सृजति। अध्याशयचित्तं च नोत्सृजति। ये चान्ये दोषोपसंहिता मनःसंकल्पास्तेभ्यः सर्वेभ्यः प्रतिविरतो भवति। न च तैः सार्धं संवसति। अयमुच्यते मनःसंवरः। तच्च मनो मायोपममित्यवतरति। स्वप्नोपममपि मरीच्युपममपि निर्मितोपममिति प्रतिभासोपममित्यवतरति। न कुतश्चिदागमनतोऽवतरति। स्वप्नोपमं सुख-

1 B महामैत्रीविहारं प्रतिलभते। महाकरुणाविहारं प्र०। महामुदिताविहारं प्र०। महोपेक्षाविहारं प्र०। क्षेमांश्च वितर्कान् प्र०। प्रविवेकांश्च वितर्कान् प्र०। अयमुच्यते कुमार मनःसंवरः। येन मनःसवरेण समन्वागतो बोधिसत्त्वो महासत्त्वः हितैषितां etc.

मवतरति। स्वप्नोपममनित्यतोऽवतरति। स्वप्नोपमं निर्जीवतोऽवतरति। स्वप्नोपमं शून्यतोऽवतरति। तच्च नोपलभते न कल्पयति न मन्यते ना[व]ल[म्बते नाभिनिवि]शते। अयमुच्यते, कुमार मनःसंवरः।

[1]परिशुद्धमनःसमुदाचारो[2] हि कुमार बोधिसत्त्वो महासत्त्वः सर्वक्षणांश्च[3] वर्जयति। अचिन्त्यांश्च सर्वबुद्धधर्मान् प्रतिलभते। [सर्वबुद्धेभ्यश्च] [4]सर्वबुद्धाभिज्ञां अकोप्यां च चेतोविमुक्तिं प्रतिलभते। अयमुच्यते मनःसंवरः।

अथ[5] खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत।

श्रृणोथ[6] सर्वि[7] अविक्षिप्तमना
मम भाषतो[8] मनःसंवरणम्।
श्रुत्वा च तत्र प्रतिपद्यथा मे[9]
यदीच्छथा लघु विशोधनताम्[10] ॥७२॥
मनःसंवरेण लभि[11] येन विदु
परमप्रशान्त विपुलानचलान्।

1 A & B add तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतनामन्त्रयते स्य। तस्मात्तुह कुमार मनःसमुदाचारो भविष्यामीत्येवं कुमार त्वया शिक्षितव्यं। तत् कस्य हेतोः।
2 C मन समाचार
3 A & B सर्वालक्षणान् विवर्ज०
4 B drops सर्व०
5 B तत्र
6 C निश्रृणोथ
7 A drops सर्वि
8 A भाषते मनस सम्वर ; B मन भाषितो
9 B श्रुत्वा च तस्य प्रतिपद्यथ मे ; C प्रतिपद्य
10 A यदिच्छेत् स्यानु लघुविबोधनतां ; B यदिच्छ स्वस्त्यलघु
11 A मनसम्बरेण लघु येन

जिनधर्म चिन्तिय तथाद्भुततां[1]

मनःसंवरुच्यति विशुद्ध अयम् ॥७३॥

मनःसंवरेण लभि येन[2] विदु

चेतोविमुक्तिमचलां सततम् ।

वज्रोपमं[3] तथ समाधिवरं

मनःसंवरूच्यति हि श्रेष्ठ अयम् ॥७४॥

निष्पादयत्यपि च येन विदु

उपचाररश्मिं[4] विपुलार्थकरीम् ।

आर्याष्टांगुपेतस्वर[5] येन लभी

मनःसंवरूच्यति विशुद्ध अयम् ॥७५॥

मनःसंवरेण विदु[6] येन वरां

द्वात्रिंशलक्षण[7] लघू लभते ।

दश चो[8]बलान्यखिलबुद्धगुणान्

मनःसंवरः कथितु श्रेष्ठ अयम् ॥७६॥

मनःसंवरेण लभि येन विदु

प्रतिसंविदस्तथ विशारदताम्[9] ।

1 B ०ता

2 A लभि ये ; B ०ण भि न येन

3 A ०पम ; B ०पमां

4 C ०पचार०

5 A षष्ठांगुपेत स्वरु ; B दृष्टागुपेतस्वरु ; see above, p. 619.

6 B मनसम्वरेणापि

7 B ०लक्षणाश्च

8 B दशवचो

9 C ०रदता ; B प्रतिसंविदं तथा विशारतां

परमाद्भुतान्[1] गुण अचिन्त्य तथा

मनःसंवरः कथितु श्रेष्ठु अयम् ॥७७॥

मनः[सं]वरेण लभि येन विदु[2]

स्मृत्युपस्थान चतु[3] ऋद्धिपादान् ।

सम्यक् प्रहाण बल इन्द्रिय[4] चो

मनःसंवरः कथितु श्रेष्ठ अयम्[5] ॥७८॥

1 A ०द्भुतां

2 A चतु

3 Tib 256b, l. 5 omits चतु

4 B चार ; Tib. l. 6 इन्द्रियवल पञ्च

5 A & Tib. add

मनःसंवरेण लभि येन विदु
ब्राह्मा विहार चतुरो निखिलान् ।
तथ शून्यतानिमित्ताप्रणिहितं च मुखं
मनःसंवरः कथितु श्रेष्ठ अयम् ॥

मनःसंवरेण लभि येन विदु
करुणाविहारु महुपेक्षु लभी ।
तथ ईर्य चर्य महमैत्रिवरां
हित चित्तु भोति स सर्व सत्त्व ॥
मनःसंवरेण युक्ततो भवति

B adds मनःसंवरेण लभि येन विदु
चतुर्ब्रह्मविहार चतुरो निखिलान् ।
शून्यानिमित्ताप्रणिहितं च मुखं
मनःसंवर कथितु श्रेष्ठ अयम् ॥

मनःसंवरेण लभि येन विदु
महुपेक्षता विहारण परम प्रवरम् ।
मनःसंवरेण विदु येन यतो
मिथ्याकुदृष्टि-सह नो वसती ॥

गुरुणां च शाठियु न स जनयी
मनःसंवरः कथितु श्रेष्ठ अयम् ।

मनःसंवरेण लघु[1] येन विदु
बोध्यङ्ग सप्त लभते विमलान्[2] ।
अष्टाङ्गिकं च तथ मार्गवरं
मनःसंवरः कथितु श्रेष्ठ अयम्[3] ॥७९॥

मनःसंवरेण लभि येन विदु
मद्दुपेक्षता[4] विहरणं प्रवरम् ।
करुणाविहारिममलं[5] च परं
मनःसंवरः कथितु श्रेष्ठ अयम् ॥८०॥

मनःसंवरेण लभि येन शिवान्[6]
क्षेमान् वितर्क विदु शुद्ध सदा[7] ।
लभते गुणाढ्यु प्रविवेककथां
मनःसंवरः कथितु श्रेष्ठ अयम् ॥८१॥

मनःसंवरेण विदु येन युतो[8]
मिथ्या कुदृष्ट्या सह न[9] वसति ।
व्यापादाभिध्या न च संजनयी
मनःसंवरः कथितु श्रेष्ठ अयम् ॥८२॥

मनःसंवरेण विदु येन युतः
कुहनां करोति न मुहूर्तमपि ।

1 B & Tib. 257a, l. 2: लभि
2 A विपुलां
3 B omits stanzas 79-82
4 C मद्दुपेक्षथा
5 A ०विहारमचलं
6 A शिवां
7 A शुद्धमनाः Tib. 257a, l. 3: shi-ba-dgaḥ-bai-yid
8 C सदा
9 A ०कुदृष्टि सह नो

गुरूणां च शाठियु[1] न संजनयी
मनःसंवरः कथितु श्रेष्ठ अयम्[2] ॥८३॥
मनःसंवरेण विदु येन युतो
रागथ द्वेष न जनेति मनः।
तथा मोह चित्तु न जनेति क्वचिन्
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८४॥
मनःसंवरेण[3] विदु येन युतो
बोधाय चित्तु न[4] विनिःसृजति[5]।
अध्याशयं च न[6] विकोपयती
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८५॥
मनःसंवरेण विदु येन युतो
ये चान्यदोष[7] विविधा मनसः।
सर्वेभि[8] सार्धं न [च] संवसती
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८६॥
मायोपमं च मन ओतरती[9]
सुपिनोपमं तथ मरीचिसमम्[10]।

1 C करुणां च शाधियु ; see Tib. 257a, l. 6.
2 C रागेथ
3 A मनसंवरे
4 C चिन्तन
5 B ०ती
6 A न च ; C अध्याशयं मन
7 A & B चान्यि दोष
8 B सर्वेहि
9 A & C मन ओत्तरति ; B मन ओतेरति
10 B adds अथ खलु भगवान् पुनरपि चन्द्रप्रभकुमारभूतमामन्त्रयते स्म ।

प्रतिभास[1]लक्ष[ण]मथो सततं
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८७॥
सुपिनोपमं च सुखमोतरती
तथनित्य शून्यत अशाश्वत[तः][2] ।
मन एव ओतरति[3] येन विदु
मनःसंवरः कथितु श्रेष्ठु अयम् ॥८८॥
निर्जीवमोतरति[4] निःसत्त्व मनो
उत्पन्नु प्रत्ययत चक्रसमम्[5] ।
न कुतश्चिदागतु न चापि [6]गतं
मनःसंवरः कथितु श्रेष्ठ अयम् ॥८९॥
न च तन्मन्ये[7] उपलभाति क्वचि
न च कल्पयत्यथ न म[न्य]त्यसौ[8] ।
नालंभते विनिविशति न चो[9]
मनःसंवरः कथितु श्रेष्ठु अयम् ॥९०॥

1 B प्रभास० 2 B असास्वततः
3 A एवमोत्तरति ; B एवमोतरि ; C उत्तरति 4 A निर्जीवतरि
5 A निर्जीवमोत्तरति निसत्त्वमना उत्पन्नु प्रभाय नलातचक्रसमं ; B नलात चक्रसमं ; Tib. 257b, l. 4: mgal. me. bskor. ba.
6 A क्वचिद्गतं 7 A तं मना ; C ततत्परो
8 A & B मन्यति सो
9 A & B नालंबते निविशाति न चो ; C ०शाति मनो

परमार्थसत्य[1] सुपिनेन समं
निर्वाण[2] स्वप्नसममोतरति[3] ।
मन एवमोतरति येन विदु
मनःसंवरः कथितु श्रेष्ठ अयम् ॥९१॥

[इति श्रीसमाधिराजे[4] कायवाङ्मनःसंवर-परिवर्तः
अष्टत्रिंशतितमः[5]] ॥३८॥

1 A ०सत्त्व
2 A निर्वाण ; C ०निर्वाहु
3 B स्वप्नसमोतरती ; C मोत्तरति
4 B drops इति श्रीसमाधिराजे
5 A मनससंवरपरिवर्तश्चत्वारिंशतिमः ; B कायवाक्मनःसंवरपरिवर्तो नाम चत्वारिंशतितमः । In MS. A, this chapter has been subdivided into three as कायसंवरः, वाक्संवरः and मनःसंवरः । Though MS. B followed MS. A in numbering the chapters, it, however, ended the chapter as indicated above.

ऊनचत्वारिंशपरिवर्तः

[1]तत्र कुमार कतमा कर्मविशुद्धिः। यदिदं[2] स्वप्नोपमं त्रिभवं दृष्ट्वा तत्र [3]विरागतामुत्पादयति। इयमुच्यते कर्मविशुद्धिः[4]। तत्र कतम [5]आलम्बनसमतिक्रमः। यदिदं मायोपमतां स्कन्धधात्वायतनानां बुद्ध्वा तेषां व्यवसर्गः। अयमुच्यते आलम्बन[5]-समतिक्रमः। तत्र कतमा स्कन्धपरिज्ञा। यदिदं मरीच्युपमतां स्कन्धानामवतरति[6]। तत्र कतमा धातुसमता। यदिदं निर्मितोपमानां धातूनां प्रतिनिसर्गः। तत्र कतम आयतनाप्रकर्षः[7]। यदिदं प्रतिभासोपमानामायतनानां प्रतिनिसर्गः। त०[8] तृष्णाप्रहाणम्। य०[9] सर्वधर्माणामनालम्ब[न]ता। त० अनुत्पादसाक्षात्क्रिया। य० सर्वधर्माणामनुपलब्धिः। त० क्रियावतारः। य० वीर्यसमुत्थितस्य दुःखस्याविप्रणाशः। त० हेतुदीपना[10]। य० प्रतिश्रुत्कोपमानां स्कन्धानामभिनिर्वृतिः[11]। त० फलाविप्रणाशः। य० स्वप्नोपमस्य कर्मफलस्याविप्रणाशः। त० धर्मदर्शनम्। य० सर्वधर्माणामपश्यना[12]। त० मार्गभावना। य०

1 A adds तत्र भगवान् पुनरपि चन्द्रप्रभं कुमारभूतमेतदवोचत्।

2 A यदुतेदं

3 A विरागमुत्०

4 A, B & Tib. इयमुच्यते कुमार कर्मपरिशुद्धिः

5 Mss. आरम्बण०

6 B स्कन्धध.त्वानामवतरति

7 Tib. 258a, l. 4: sel. va=अपनय

8 त०=तत्र कतरः or कतरा or कतमा or कतरत्

9 य०=यदिदं

10 A परिदीपना

11 B निवृत्तिः

12 B & C ०पश्यनता

सर्वधर्माणामनुपलब्धिभावना। त॰ तथागतसमवधानम्। य॰ सर्वबुद्धानां शिक्षा-प्रतिपत्तिः। त॰ तीक्ष्णप्रज्ञता[1]। य॰ सर्वधर्माणा[2]मनुत्पत्तिकक्षान्तिः। त॰ सत्त्वानुप्रवेश[3]ज्ञानम्। य॰ इन्द्रियपरापरज्ञताज्ञानम्। त॰ धर्मज्ञानम्। य॰ सर्वधर्माणामनुपलब्धिः[4]। त॰ प्रतिसंविदावतारज्ञानम्। य॰ यथाभूतधर्मनयप्रवेशः[5]। त॰ अक्षरप्रभेदज्ञानम्। य॰ त्रिमन्त्रप्रयोगज्ञानम्। आकारानाकारज्ञानम्[6]। त॰ वस्तुसमतिक्रमः। य॰ अवस्तुबुध्यना[7]। त॰ घोषपरिज्ञा। य॰ प्रतिश्रुत्कोपमावतारज्ञानम्। त॰ प्रामोद्यप्रतिलाभः। य॰ सर्वधर्माणामनुपलब्धिः। संसारात् दुःखस्य उत्सर्गो भारावहरणम्[8]। त॰ [धर्म][9]प्रीत्यनुभवनता। य॰ अववाद-सन्तोषणानुत्सर्गस्वयानानुशंसा[10]पश्यना। त॰ आर्जवता। य॰ आर्यसत्यप्रतिवेधः[11]। त॰ रिजुकता[12]। य॰ ईर्यापथस्याकल्पनता[13]। त॰ अपगतभ्रूकुटिकता[14]। य॰ दोषप्रहाणम्। त॰ सौशील्यता[15]। य॰ सुखसंवासता[16]। त॰ माधुर्यता। य॰

1 A ॰प्रज्ञा
2 A ॰णामनुत्पाद॰
3 A & B ॰प्रवेशे ; C कतमस्मिन् वानुप्रवेशे
4 A सर्वधर्माणां यथाभूतविशुद्धिज्ञानं
5 A यदिदं सर्वसत्त्व यथाशयावबोधनं ज्ञानं ; B धर्मनयप्रतिवेधः
6 A & B अकाराकारज्ञानञ्च
7 A बुध्यतां ; B ॰बुध्यना
8 A निःसाराद्दुःखस्य भारामहरणं ; C भारावपारणम्
9 Tib. 259a, l. 1 adds it.
10 A ॰सर्गः स जानानुशंसा ; B ॰सर्गः स्वयानानुशंसा पश्यना ; C सर्गस्य सानु॰
11 A & B ॰सत्यप्रतिवधः
12 A & B ऋजु॰
13 A & B ॰पथस्याविकल्प॰
14 B ॰टिमूलता
15 A तत्र स खिल्यते ; B साखिल्यता ; Tib. 259a, l. 3: dge. ba
16 C संचरता

परेषु हितवस्तुता । त० पूर्वालापिता[1] । य० एहि स्वागतवचनता[2] लघूत्थानता । त० गुरुगौरवता । य० गुरूणामन्तिके भयं च कल्याणमित्रता च । त० गुरुशुश्रूषा । य० गुरूणामुपस्थानावस्थानपरिचर्या । त० उपपत्तिसंतुष्टिः । य० सर्वोपपत्तिष्वनास्वादनता[3] । त० [4]शुक्लधर्मातृप्तता[4] । य० [4]शुक्लधर्माणां पर्येष्टिः किंकुशलमार्गणता च[5] ।

त० आजीवपरिशुद्धिः । य० इतरेतरसन्तुष्टिता अकूहणता[6] अनैषिकता । लाभेन लाभाचिकीर्षणता च[7] । त० अरण्यवासानुत्सर्गः । य० [8]अनिक्षिप्तधुरता कुशलेषु धर्मेषु प्रान्तशय्यासनाभिरतिर्वनगहनगिरिदुर्गगुहाकन्दरेष्वभिरतिः धर्मप्रीत्यनुभवनता च । असंसर्गः गृहिप्रव्रजितैरभिसत्कारश्लोके नाध्यावसानता तृष्णाप्रहाण-ध्यानप्रीत्यनुभवनता च । अयमुच्यतेऽरण्यवासानुत्सर्गः । त० भूम्यवस्थानज्ञानम्[9] । य० [10]श्रावकभूमिफलव्यवस्थानज्ञानं [प्रत्येकबुद्धभूमिव्यवस्थानज्ञानं बोधिसत्त्वभूमिव्यवस्थानज्ञानं च । त० स्मृत्यविप्रणाशः । य० अनित्यदुःखशून्या-

1 A पूर्वाभिलापिता ; B ०भिलषिता

2 A & B स्वागतवादिता

3 A सर्वोपरिप्रसादता ; B ०पत्तिस्थानास्वादनता

4 B सुरु०

5 The Gilgit ms. C ends here. The subsequent portion is taken from Mss. A & B.

6 B adds अलपनता

7 A लाभाविकर्षणता ; cf. Mahāvyutpatti, 127.

8 B य० विक्षिप्त०

9 A ०नुभवन तावत् सुसंर्गा

10 B श्रावकफल०

नात्मामनसिकारः। त० स्कन्धकौशल्यज्ञानम्। य० स्कन्ध-धात्वायतन-[1]प्रभेदज्ञानञ्च तत्र चानुपलब्धिः। त० अभिज्ञा-साक्षात्क्रिया। य० चतुर्णामृद्धिपादानां प्रतिलम्भः ऋद्धि-विकुर्वणता च। त० क्लेशापकर्षः। य० रागद्वेषमोहप्रहाणम्। त० [2]वासनानुसन्धिसमुद्घातज्ञानम्। य० पूर्वबालचरि-विजुगुप्सनता श्रावकप्रत्येकबुद्धभूम्यस्पृहणता च। त० विशेषगामिता। य० बुद्ध-वैशारद्यप्रतिसंविदां निष्पादनता च। त० भावनाभिनिष्यन्दः। य० अनुनयप्रतिघप्रहाणम्। त० आपत्ति-कौशल्यम्[3]। य० प्रातिमोक्ष-विनयसंवरः। त० पर्युत्थान[4]-विष्कंभणम्। य० [5]अत्ययदेशना आयतिसंवरश्चाकुशलानां धर्माणाम्। त० अनुनयप्रहाणम्। य० त्रैधातुकभवतृष्णालता[6] समुद्घातोऽसमुत्पन्नानां चाकुशलानां धर्माणामनुत्पादनता। उत्पन्नानां च कुशलमूलानां[7] धर्माणामविप्रणाशः। त० भवसमतिक्रमः। य० त्रैधातुकानुपलब्धिः। अमनसिकारता च। त० जातिस्मरता। य० पूर्वनिवासज्ञानम्। त० कर्म-विपाकनिष्काङ्क्षणता। य० उच्छेदशाश्वतविवर्जनता। त० धर्म-चिन्ता। य० यथाभूतचिन्ता। त० श्रुतपर्येष्टिः। य० श्रावकप्रत्येक-बुद्धपिटकस्य बोधिसत्त्वपिटकस्य च आधारणता भावनता च। त०

1 C अभेद

2 B वासनासु सर्वि समु०

3 Tib. 260a, l. 4: ལྟུང་བ་ལས་འབྱིན་པ་ལ་མཁས་པ།

4 B पर्यवस्थानविष्कम्भन-विष्कम्भन'

5 A सत्यापदेशना ; B मद्ययेदेशन

6 A तृष्णाभिलाष

7 B कुशलानां

ज्ञानतीक्ष्णता। य० स्वप्नोपममनुत्पादज्ञानम्। त० ज्ञानतृष्णा। य० ज्ञानपर्येष्टिः। त० ज्ञानावबोधः। य० अनुत्तरसम्यक्संबोध्यभिनिष्पादनता च। त० [1]आजानेयभूमिः। य० बोधिसत्त्वशिक्षास्थानम्। त० शैलोपमता। य० बोधिचित्तस्यानुत्सर्गः। त० अकम्पनता। य० क्लेशैरसंहार्यता। त० अचलनता। य० सर्वनिमित्तानाममनसिकारः। त० अवैवर्त्यलक्षणम्। य० षट्पारमितानामखण्डनता। [2]अन्यलोकधातुस्थितानां बुद्धानामभीक्ष्णदर्शनता च। त० [3]कुशलधर्माभिसम्पत्[4]। य० [5]आसन्नीभावोऽनुत्तरायाः सम्यक्संबोधेः। त० पापकर्मजुगुप्सनता। य० आयतिसंवरता चानुत्पादस्य पापस्य। त० क्लेशानामसमुदाचारः। य० अविद्याया भवतृष्णायाश्च क्रोधस्य चानुत्पादनता। त० शिक्षाया अपरित्यागः। य० [6]कर्मविपाक-पत्तीयनता[7] बुद्ध-गौरवता च। त० समाधिव्यवस्थानम्। य० चित्तचैतसिकानां धर्माणाम् अनुत्पादाव्ययकौशल्यं चित्तैकाग्रता च। त० सत्त्वाशयज्ञानम्। य० इन्द्रियपरापरज्ञताज्ञानम्। त० उपपत्तिविशेषज्ञानम्।

1 B आसनेय०

2 B अनेक० ; see Tib. 260b, l. 7.

3 A शुक्ल

4 Tib. 261a, l. 1: ཆོས་ཕུན་སུམ་ཚོགས་པ །

5 A आसन्नीभूतानुत्तरयाः सम्यक्संबोधिः

6 B adds पञ्चानां गतीनां व्यवस्थानज्ञानम्.

7 Tib. 261a, l. 3. Cf. Sans. प्रतीयनता। See Infra, p. 633.

य० पञ्चानां गतीनां व्यवस्थानज्ञानम्। त० ज्ञानानन्तता[1]। य० लौकिकलोकोत्तरेषु शिल्पेष्वनाभोगज्ञानम्। त० वचनप्रतिसन्धिज्ञानम्। य० तथागतसन्धाभाष्यानुबुध्यनता। त० गृहावासपरित्यागः। य० कायचित्तविवेकाभिनिष्क्रमः। त० त्रैधातुकेऽनभिरतिः। य० त्रैधातुक-यथाभूतदर्शनता। त० चित्तस्यानवलीनता। य० चित्तस्यापरित्यागः समापद्यमानापरित्यागश्च। त० धर्मेष्वभिनिवेशः। य० सर्वस्नेहप्रहाणम्। त० धर्मपरिग्रहः। य० बुद्धबोध्यारक्षा। एषाञ्चैव सूत्रान्तानां प्रतीच्छनता। त० धर्मगुप्तिः। य० सद्धर्मप्रतिक्षेपकाणां सह[2]धर्मेण निग्रहः। त० कर्मविपाकपत्तीयनता। य० लज्जया पापकात् कर्मणो विरतिः। कुशलधर्मपर्येष्टौ चाभियोगः। त० विनयकौशल्यम्। य० प्रकृत्यापत्त्यनापत्ति[3]-बुध्यनता च। त० अधिकरणव्युपशमः। य० गणविवर्जनता। त० अविग्रहोऽविवादः। य० लौकिक-कथानिरर्थिकता[4]। त० क्षान्तिभूमिः। य०कायचित्तपीडाधिवासनता। त० क्षान्तिसमादानम्। य० परतो दुरुक्तानां[5] वचनपथानामध्युपेक्षा क्षान्त्यखण्डनता च। त० धर्मप्रविचयः। य० स्कन्धधात्वायतनानां प्रभेदः। संक्लेशव्यवदानपक्षस्य च प्रभेदस्तेषां चानुपलब्धिः। त० धर्मविनिश्चयकौशल्यम्। य० सर्व-

1 A आज्ञाच्छता; see Tib. 261a, l. 6.

2 B सर्वे

3 B प्रकत्यानापत्ति०

4 B ०कथानर्थिकता

5 A & B add दूरागतानां

धर्माणामनभिलापः[1] । त० धर्मपदप्रभेदज्ञानम् । य० सर्वधर्माणां व्यवस्थाननिस्तीरणता । त० धर्मपदनिर्हारकौशल्यम् । य० यथाभूतानां धर्माणां निर्देशः । त० अर्थानर्थसंभेदनिर्हारकौशल्य-ज्ञानम् । य० धर्म-प्रकृत्यनुतक्षेपाप्रक्षेपः । त० पूर्वान्तज्ञानम् । य० हेतुज्ञानम् । त० अपरान्तज्ञानम् । य० प्रत्ययज्ञानम् । त० त्रिमण्डलपरिशुद्धिज्ञानम्[2] । य० अतीतानागतप्रत्युत्पन्नानां धर्माणामनुपलब्धिः । अमनसिकारता च । त० चित्तावस्थानम् । य० चित्तानुपलब्धिः । त० कायव्यवस्थानम् । य० कायगतानु-स्मृतिः । त० [3]ईर्यापथलक्षणम् । येयमार्यधर्मासंभ्रान्तता । त० ईर्या-पथस्याविकोपनता[4] । य० [5]प्रच्छन्नकल्याणता । त० ईर्यापथस्या-विकल्पनता । य० विगतपापेच्छता । त० [6]इन्द्रियप्रासादिकता । य० धर्मगत[7]मनसिकारता युक्तभाणिता[8] कालज्ञता यथाभूतानां धर्माणां भूतप्रकाशनता । त० लोकज्ञता । य० अतिक्रममसंप्रजा-नता । त० [9]मुक्तत्यागिता । य० सतां वस्तूनामग्रहणता[10] । अमात्-सर्यता च । त० प्रततपाणिता । य० संविभागशीलता । त० अगृहीतचित्तता । य० श्रद्धानाविलता । त० [11]व्यपत्रापिता । य०

1 A ०लाषः

2 A drops from यथाभूतानां up to परिशुद्धिज्ञानम् ।

3 A ऐर्या०

4 A ०कोपरता

5 B प्रतिच्छन्न०

6 A omits इन्द्रिय

7 B धर्मगति०

8 A ०भणिता

9 A & B युक्ति

10 Tib, 262b, l. 7: དངོས་པོ་རྣམས་མི་སྒྲེད་པ །

11 A ह्री-व्यप० ; B ह्रियापणता

अमुखरता। त॰ ह्रियापणता। य॰ अनभिमुखता[1]। त॰ अकुशलचित्तजुगुप्सनता। य॰ बालधर्मबुध्यनता तैश्चासमवधानम्। त॰ धूतानवसृजनता। य॰ दृढसमादानता। त॰ चारित्रसमवधानता। य॰ चर्यापथक्रम-संजानता। त॰ प्रीतिसमुदाचारः। य॰ कुशलानां धर्माणामनुशंसाचित्तता। त॰ गुरूणामासनप्रत्युत्थानम्। य॰ निहतमानता। अनालस्यता च। त॰ मानस्य निग्रहः[2]। य॰ आत्मनोऽनुपलब्धिरनालम्बनता च। त॰ चित्तस्य संग्रहः[3]। य॰ शुक्लधर्माणामविप्रणाश[4]-ज्ञानम्। त॰ चित्तोत्साहनता। य॰ वीर्यफलाविप्रणाशज्ञानम्। त॰ अर्थप्रतिसंविज्[5]-ज्ञानम्। य॰ यथाभूतसत्यप्रतिवेधज्ञानम्। त॰ ज्ञानानुबोधः। य॰ लौकिक-लोकोत्तराणां धर्माणामनुबुध्यनता। त॰ अज्ञानविगमः। य॰ यथाभूतानां धर्माणामध्यारोपविगमः। त॰ चित्त[6]प्रवेशज्ञानम्। य॰ उत्पादव्ययज्ञानम्। त॰ आहारनिर्हारकौशल्यज्ञानम्। य॰ तीक्ष्णप्रज्ञता। त॰ रुतरवितज्ञानम्। य॰ यथाभूतधर्मप्रकाशनता। त॰ व्यवस्थानज्ञानम्। य॰ यथाभूतस्यावतारज्ञानम्। त॰ अर्थविनिश्चयः। य॰ संस्कारस्कन्धोच्छेदः। त॰

1 A & B त॰ अपत्रपणता। य॰ अव्ययकृता ; Tib. 263a, l. 1:
དེ་ལ་ངོ་ཚ་ཤེས་པ་གང་ཞེ་ན། འདི་ལྟ་སྟེ། མངོན་དུ་ཕྱུར་བའོ།

2 A & B विग्रहः

3 B संप्रग्रहः ; Tib. 263a, l. 5: རབ་ཏུ་བཟུང་།

4 B adds सुरूपधर्माणामविप्रणाशज्ञानम्

5 A & B ॰प्रतिसन्धिज्ञानम्

6 B चित्तस्य प्र॰

[1]अर्थानर्थविवर्जनता। य० भवसमतिक्रमः। परेषाञ्च भवसमतिक्रमणावतारणता च। त० सत्पुरुषाश्रयः। य० बुद्धाविरहितता। त० सत्पुरुषसमवधानम्। य० बुद्धबोधिसत्त्वप्रत्येकबुद्धश्रावकसेवनता। त० असत्पुरुषवर्जनता[2]। य० उपालम्भिकानां कुशीदानां च विवर्जनता। त० ध्यानाभिरतिः। य० कामकण्टक[3]विवर्जनता ध्यानानामनुत्सर्जनता प्रीत्यविजहरता[4] च। त० ध्यानेष्वनध्यवसानम्। य० त्रैधातुकसमतिक्रमणच्छन्दः सत्त्वपरिपाचनाच्छन्दः। उत्तरिप्रज्ञावभासच्छन्दश्च। त० अभिज्ञाविकुर्वणता। य० पञ्चस्वभिज्ञासु स्थित्वा दुर्विज्ञेयानां बुद्धधर्माणां परेभ्यः संप्रकाशनता। त० नामसङ्केतः। य० अपरिनिष्पन्नानां नाम्नाम[नु]बुध्यनता। त० प्रज्ञप्तिव्यवहारः। य० लोकव्यवहारः। त० प्रज्ञप्तिसमुद्घातः। य० [5]प्रव्याहारज्ञानम्। त० संसारनिवृत्तिः। य० संसारदोषप्रत्यवेक्षा। त० लाभानर्थिकता। य० भूताल्पेच्छता। त० लाभसत्कारानादेयता[6]। य० अनुत्कण्ठता[7] च विगतपापेच्छता च। त० [8]अवर्णैरमंकुभावता। य० स्कन्धधातुपरीक्षाज्ञानम्। त० भूतानां वर्णानामनधिवासनता। य० प्रतिच्छन्न[9]कल्याणता च लाभसत्कारस्य चान्तरायबुध्यनता। त० सत्कारेषूपेक्षा। य० कर्मविपाकबुध्यनता। त० असत्कारेष्वमंकु-

1 B omits अर्थ
2 B omits from ०षाश्रय to ०वर्जनता
3 B omits कण्टक
4 B प्रीति अविवर्जनता च
5 A & B प्रत्याहार०
6 A ०रादीनता ; B ०रादीयनता
7 B अनुत्त्रणता च
8 B अवर्णो अमंकु०
9 Tib. 264b, l. 1: དགེ་བ་མི་སྟོན་པ་པ །

भावता । य० योगस्यानुत्सर्जनता । त० निन्दायामकुप्यनता । य० लौकिकधर्मप्रत्यवेक्षा । त० प्रशंसायामुपेक्षा । य० कल्याणधर्मपर्येष्टिनिष्क्रमणम् । त० अलाभेऽलीनता[1] । य० [2]स्वयंकृतानां धर्माणां प्रत्यवेक्षणता । त० गृहिभिः सार्धमसंस्तवः । य० आमिषकिंचित्[3]विवर्जनता । त० प्रव्रजितैः सार्धमसंस्तवः । य० अयुक्तविवर्जनता युक्तपर्येषणता च । त० अगोचरविवर्जनता । य० पंचानां [4]निवरणानां प्रहाणम् । त० गोचरप्रचारः । य० स्मृत्युपस्थानानां भावना । त० आचारसंपद् । य० परानुरक्षा । त० आचारविवर्जनता । य० आत्मनः कल्याणधर्मानुरक्षणता । त० कुलानामदूषणता[6] । य० [7]ज्ञातविवर्जनता[8] । त० शासनरक्षा । य० धर्मपर्येष्टिसमादानता धर्मानुधर्मप्रतिपत्तिश्च । त० अल्पभाष्यता । य० शमथप्रतिलम्भः । त० मार्दवता । य० विपश्यनाप्रतिलम्भः । त० प्रतिवचन-कौशल्यम् । य० उत्तरप्रत्युत्तरज्ञानम् । त० प्रत्यर्थिकनिग्रहः । य० यथाभूतानां धर्माणां

1 A अलाभेऽलीनवता ; B अलाभेऽनवलीयनतां ; Tib. 264b, l. 4:
དེ་ལ་རྙེད་པ་མེད་ཀྱང་སེམས་འགོང་བ་མེད་པ་གང་ཞེ་ན །

2 A & B पूर्वस्वयं०

3 A & B किं चित् कर्मवि०

4 A & B विवरणानां

6 A & B कुशलां ; Tib. 265a, l. 1:
དེ་ལ་རིགས་སུན་པར་མི་བྱེད་པ་གང་ཞེ་ན །

7 A ज्ञात० ; Tib. 265a. l. 2: ཤེས་ཀྱི་ཁ །

8 A adds आपत्तेरुपद्धरणता

प्रकाशनता[1] व्यवस्थापनता च। उपालम्भनिग्रहश्च। त० काल-प्रतिक्रमः[2]। य० कालज्ञता[2]। त० पृथग्जनेष्वविश्वासः। य० बालधर्मदोषदर्शिता। त० दुःखितानामपरिभवः[3]। य० सर्व-सत्त्वेषु समचित्तता। त० दुःखितानां धनानुप्रयच्छनता। य० लोकामिषदानम्। त० दरिद्राणामनवसादनम्। य० परेषामन्तिके कृपाबुद्धिता। त० दुःशीलानामनुकम्पना[4]। य० परेषामापत्ते-रुद्धरणता च शीलप्रतिष्ठापनता च। त० हितवस्तुता। य० परेषामुपकारकरणता। त० कृपाबुद्धिता। य० सत्त्वानामना-गतदुःखपश्यनता। त० धर्मानुग्रहः। य० परेषां यथाभूतधर्माव-तरणता। त० आमिषपरित्यागः। य० स्कन्धपरित्यागः। परेषां [5]चामिषानुग्रहः। त० असंनिचयस्थानम्। य० आमिष-जुगुप्सनता। आरक्षादोषदर्शनता च। त० शीलप्रशंसा। य० शीलफलानुबोधः। त० दौःशील्यजुगुप्सनता। य० दौःशील्य-दोषबुध्यनता। त० शीलवतामकम्प्यसेवनता[6]। य० शीलवत्सु दुर्लभसंज्ञाज्ञानम्। त० [7]सर्वास्तिपरित्यागिता। य० कल्याणा-शयता। त० अध्याशयनिमन्त्रणता। य० परेषां सुखार्थिकता।

1 A प्रभावता ; B प्रभावनता 2 B omits it.

3 Tib. 265a, l. 6: བརྙས་པ་མེད་པ། =अवज्ञा

4 B ०कम्पनता

5 Tib. 265b, l. 4: གཞན་ལ་ཟང་ཟིང་གིས་ཕན་འདོགས་པའོ།

6 A & B ०वतासससाध्यसे ; Tib. 265b, l. 6: གཡོ་མེད་པར།

7 A सर्वापत्ति०

त॰ यथोक्तकारिता। य॰कल्याणाशयसम्पद्। त॰ अभीक्ष्ण-पर्युपासनता। य॰ कुशलगवेषणपरिपृच्छनता। त॰ प्रीत्यनु-भवनता। य॰ अधिगमज्ञानं चागमज्ञानं च। त॰ दृष्टान्त-ज्ञानम्। य॰ उपमाज्ञानमवदानज्ञानञ्च। त॰ पूर्वयोगकौशल्यम्। य॰ जात्यनुस्मरणता श्रुतबहुलता च। त॰ कुशलमूल-पूर्वं-गमता। य॰ बोधौ तीव्रच्छन्दता च परेषां समुत्साहनता च। त॰ उपायकौशल्यम्। य॰ प्रतिदेशनानुमोदनाध्येषणा-कुशला-नाञ्च परिणामनाकौशल्यम्। त॰ निमित्तप्रहाणम्। य॰ स्वप्नो-पमानां धर्माणां बुध्यनता च वस्तुविभावनता[1] च। त॰ संज्ञाविवर्तः। य॰ विपर्यासोत्सर्गः। त॰ वस्तुलक्षणता। य॰ अलक्षणज्ञानम्। त॰सूत्रान्ताभिनिर्हारकौशल्यम्। य॰यथाभूतानां धर्माणां कुशला-कुशलानाम् उपमावदानैः सम्प्रकाशनता। त॰ सत्यविनिश्चयः। य॰ विज्ञाननिरोधो नामरूपानुत्पत्तिश्च। त॰ विमुक्तिसाक्षात्-क्रिया। य॰ वज्रोपमसमाधेरचलनता अकुप्यनता च। त॰ एक-प्रव्याहारः[2]। य॰ [3]तीर्थ्यायतनविजुगुप्सनता चानुत्पत्तिक-ज्ञानता च[4]। त॰ वैशारद्यप्रतिलम्भः। य॰ [5]बुद्धधर्मविबुध्यनता। त॰ शीलाधिष्ठानता। य॰ कायसंवरः प्रातिमोक्षसंवरश्च। त॰

1 Tib. 266a, l. 6: དངོས་པོ་རྣམ་པར་འཇིག་པའོ།

2 Tib. 266b, l. 3: དེ་ལ་གཅིག་ཏུ་བརྗོད་པ་གང་ཞེ་ན།

3 Tib. 266b, l, 3: མུ་སྟེགས་ཅན་གྱི་གནས་སྨད་པ།

4 A ॰ज्ञानञ्च

5 B ध्यानबलाधानता

समापत्त्यवतारः। य० त्रैधातुकवैराग्यता। त० प्रज्ञाप्रतिलाभः। य० सामर्थ्यज्ञानं चानुपलब्धिश्च। त० एकारामता। य० संगणिकादोषविवर्जनता च शुक्लधर्मानुत्सृजनता। त० अल्पज्ञात-संतुष्टिः[1]। य० इतरेतरसंतुष्टिः। त० चित्तस्यानाविलता। य० निवरणानां विष्कम्भणता। त० दृष्टिकृतानां विवर्जनता। य० उपालम्भदृष्टिविवर्जनता। त० धारणीप्रतिलम्भः। य० यथादृष्टानां धर्माणां यथाभूतासंगसंप्रकाशनता। त० ज्ञाना-वतारः। य० प्रकृतिप्रवेशः। त० स्थानम्। य० शीलस्थानम्। त० अवस्थानम्[2]। य० चित्तावस्थानम्[3]। त० प्रतिष्ठानम्। य० श्रद्धाप्रतिष्ठानम्। त० प्रतिपत्तिः। य० मार्गप्रतिपत्तिः। त० हेतुः। य० अविद्या हेतुः संसारस्य। त० युक्तिः। य० विद्या युक्ति-र्मोक्षस्य। त० नयः। य० तृष्णाप्रहाणम्[4]। त० द्वारम्। य० दोषप्रहाणम्। त० मार्गः। य० अनित्यदुःखशून्यानात्मज्ञानम्। त० भूमिः। य० दशाप्रणिहितभूमिः। त० जातिविगमः। य० जात्युपच्छेदः। त० ज्ञानभूमिः। य० असंमोहः। त० अज्ञान-प्रहाणम्। य० मोहप्रहाणम्। त० ज्ञानप्रतिष्ठानम्। य० अप्रति-ष्ठानम्। त० योगाचारभूमिः। य० सप्तत्रिंशतां बोधिपक्षिकाणां धर्माणां भावना। त० बोधिसत्त्वगोचरः। य० षट्पारमिता। त० सत्पुरुषसंसेवना। य० बुद्धाभिनिषेविता। त० असत्पुरुष-

1 A adds here य० उपालम्भदृष्टिविवर्जनता 2 Tib. मूलस्थानम्

3 A विभावस्थानं

4 A drops two lines from मार्ग० to तृष्णा-प्रहाणम्।

विवर्जनता। य॰ तीर्थिकानाम् उपालम्भदृष्टिकानां विवर्जनता। त॰ तथागतैराख्यातः। य॰ बुद्धबलेषु स्थित्वा प्रकृतिज्ञानेन मोक्षः। त॰ बुद्धभूमिः। य॰ सर्वेषां कुशलानां धर्माणां प्रतिलाभिता। त॰ पण्डितैरनुमोदिता। य॰ अतीतानागतप्रत्युत्पन्नैर्बुद्धैर्भगवद्भिः श्रावकैश्चानुमोदिता। त॰ बालैः प्रतिक्षिप्तम्। य॰ सर्वबालैर्दुर्विज्ञेयम्। त॰ श्रावकप्रत्येकबुद्धैर्दुर्विज्ञेयम्। य॰ बुद्धधर्माचिन्त्यता। त॰ अभूमिस्तीर्थिकानाम्। य॰ मिथ्यामानो योगिनाम्। त॰ बोधिसत्त्वैः परिगृहीताः। य॰ दुर्लभता च महाभैषज्यता[1] च। त॰ दशबलैरनुबद्धम्[2]। य॰ कृच्छ्रयोगेन। त॰ देवैः पूजनीयम्। य॰ सर्वसुखाहारकमुपादाय। त॰ ब्रह्मणा वन्दनीयम्। य॰ सर्वमोक्षाहारकयोगेन। त॰ नागैर्नमस्यनीयम्। य॰ सर्ववासना-[3]समुत्यागतामुपादाय। त॰ यक्षैरनुमोदनीयम्। य॰ सर्वदुर्गतीनां मार्गच्छेदनतामु॰[4]। त॰ किन्नरैः स्तवनीयम्। य॰ सर्वमोक्षप्रामोद्याहरणतामु॰। त॰ महोरगैः प्रशंसनीयम्। य॰ संसारोच्छेदनतामु[5]॰। त॰ बोधिसत्त्वैर्भावयितव्यम्। य॰ सर्वज्ञानाहारिकमु॰। त॰ पण्डितैः पर्यवाप्तव्यम्। य॰ अत्रैवत्र्यभूम्याहारित्रकमु॰। त॰ धनमनुत्तरम्। य॰ देवमानुषिकायाः प्रजायाः सम्पत्तेराहारित्वकं चोपादाय मोक्षाहारित्रकमु॰[6]। त॰ दानं निरा-

1 Tib. 268a, l. 2: སྨན་ཆེན་པོར་གྱུར་བའོ །

2 Ibid. ཁོང་དུ་ཆུད་པ །

3 B वासनासमुच्छेदतामुपादाय

4 मु॰=मुपादाय

5 A drops two lines from किन्नरैः to ॰च्छेदनतामु॰

6 B omits मोक्षहारित्वकं

त० मुद्रा [1]सर्वधर्माणाम्। य० पारादपारमवबुध्यनतामु०। त० असंहार्यता सर्वज्ञानस्य। य० सर्वाकुशलधर्मप्रहाणाय च संवर्तते सर्वकुशलधर्माहारणतायै च [2]सर्वसत्त्वमोक्षाहरणतायै संवर्तते। त० उद्यानं बोधिसत्त्वानाम्। य० सर्वप्रीतिप्रामोद्यात्मसु[खेन] सर्वसत्त्वसुखाहरणतामु०[3]। त० विद्रापणं मारसैन्यानाम्। य० सर्वबलाहारित्वकमु० सर्वक्लेशशमनं चोपादाय। त० विद्या[4] क्षेमगामिनाम्। य० सर्वोपद्रवक्षयाय संवर्तते। त० अर्थः सिद्धानाम्। य० [5]सर्वधर्मसम्पत्त्याहारित्वकमु०। त० परित्राणममित्र[6]मध्यगतानाम्। य० सर्वोपलम्भिकानां मिथ्यादृष्टिकानां पराजयतायै संवर्तते। त० सह धर्मेण तीर्थिकानां निग्रहः। य० सह धर्मेण तीर्थिकानां निग्रहमु०। त० सत्याकारो वैशारद्यानाम्। य० सर्वधर्माकोटितप्रत्याकोटितक्षेमतामु०[7]। त० भूतपर्येष्टिर्बलानाम्। य० अविपरीतयोगेन। त० पूर्वनिमित्तमष्टादशानामावेणिकानां बुद्धधर्माणाम्। य० सर्वशुक्लधर्माहरणतामु०। त० अलङ्कारः। य० द्वात्रिंशतां महापुरुषलक्षणानामाहारकमु०। त० रतिर्मोक्षकामानाम्। य० आदिमध्यपर्यवसानकल्याणतामु०। त० [9]प्रीतिर्ज्येष्ठपुत्राणाम्।

1 A omits सर्व 2 A सर्वमोच० 3 A & B ०सत्त्वासुख सर्व०
4 A विमोक्षमा० 5 A omits धर्म 6 A अमित्राण०
7 Tib. 270a, l. 1-2: དེ་ལ་མི་འཇིགས་པའི་བདེན་པའི་རྣམ་པ་གང་ཞེ་ན། འདི་ལྟ་སྟེ། ཆོས་ཐམས་ཅད་ཡོངས་སུ་བརྟགས་པ་དང་། ཕྱིར་བརྟག་པ་བཟོད་པའི་ཕྱིར་རོ།
8 A यद्दुत 9 B प्रीतिप्रामोद्य०

य० पैतृकं धनं [1]बुद्धधनानुभावाहारकमु०। त० पारिपूरिर्बुद्धज्ञानस्य। य० सर्वशुक्लधर्मानुरक्षणतामु० सर्वशुक्लधर्मानन्यपोषणाहरणतामु०। त० अभूमिः सर्वश्रावकप्रत्येकबुद्धानाम्। य० उदाराप्रमेयबुद्धधर्माहारकमु०। त० संविशुद्धिश्चित्तस्य। य० सर्वमलप्रहाणाय संवर्तते। त० परिशुद्धिः कायस्य। य० सर्व[2]ग्लानिप्रशमनतामु०। त० परिनिष्पत्तिः विमोक्षमुखानाम्। य० अनित्यदुःखशून्यानात्मशान्तप्रत्यवेक्षणतामु०[3]। त० असंक्लिष्टता रागेण। य० अमृतपदाहारिकमु०। त० विगमो दोषस्य। य० महामैत्र्याहारिकमु०। त० अभूमिर्मोहस्य। य० भूतधर्मालोकाहारकमु०। त० आगमः संज्ञानस्य। य० सर्वलौकिकलोकोत्तरकायज्ञानस्योत्पादमु०। त० उत्पादो विद्यायाः। य० सर्वयोनिशो मनसिकाराहरणतामु०। त० प्रहाणमविद्यायाः। य० सर्वयोनिशो मनसिकारविगमाय संवर्तते। त० तृप्तिर्विमुक्तिसाराणाम्। य० आर्यमाहात्म्याहरणतामु०। त० तुष्टिः समाधिसाराणाम्। य० सर्वसुखचित्तैकाग्र्याहरणतामु०। त० चक्षुर्द्रष्टुकामानाम्। य० अहंपश्यितामुपादाय। त० अभिज्ञा विकुर्वितुकामानाम्। य० अनावरणतामु० कामनीयधर्मतां चोपादाय। त० ऋद्धिरभिभवितुकामानाम्। य० सर्वधर्मविकल्पितज्ञानानावरणतामु०। त० धारणी श्रुतार्थिकानाम्। य० सर्वधर्मनिर्वाणसमतामु०। त० स्मृतेरसंप्रमोषः। य० निर्वाणालम्बनप्रकृतिव्युपशमतामु०। त० अधिष्ठानं बुद्धानाम्। य०

1 A बुद्धधर्मानु० 2 A ०ग्लान्य० 3 B ०वेक्षाहरणतामु०

अनन्ताहरणतामु॰ । त॰ उपायकौशल्यं नाथानाम्[1] । य॰ सर्व-सुखक्षेमगमनतामु॰ । त॰ सूक्ष्मम् । य॰ निर्वाणालम्बनव्युप-शमतामु॰ । त॰ दुर्विज्ञेयम् । य॰ दुःखप्रतिज्ञानतामु॰ । त॰ दुराजानताऽनभियुक्तैः[2] । य॰ अप्रतिलब्धपूर्वतामु॰ । त॰ विवर्तोऽ-क्षराणाम् । य॰ सर्ववाक्यकथानुपलब्धितामु॰ । त॰ दुर्विज्ञयो घोषेण । य॰ सर्वधर्माचिन्त्यतामु॰ । त॰ अज्ञातं विज्ञैः । य॰ रत्नमहार्थिकता-मु॰ । त॰ ज्ञानं सुरतैः । य॰ सतकाराजानतामु॰ । त॰ वि[3]-बुद्धमल्पेच्छैः । य॰ सत्काराजानतामु॰ । त॰ उद्गृहीतमारब्ध-वीर्यैः । य॰अनिक्षिप्तधूरतामु॰ । त॰ धारितं स्मृतिमद्भिः । य॰ कृताविप्रणाशतामु॰ । त॰ क्षयो दुःखस्य । य॰ रागद्वेषमोह-संवर्तनतामु॰ । त॰ अनुत्पादः सर्वधर्माणाम् । य॰ सर्वविज्ञान-निरोधतामु॰ । त॰ एकनयनिर्देशः । य॰ सर्वभवगतिच्युत्युपपत्त्या-यतनानां सर्वधर्माः स्वप्नोपमा इति सर्वधर्मानुत्पाद्यतामु॰ ।

अयमेषां त्रयाणां पदशतानां निर्देशो द्रष्टव्यः । अयं स उच्यते कुमार सर्वधर्मस्वभावसमताविपञ्चितो नाम समाधिः[4] ।

[इति श्रीसमाधिराजे एकोनचत्वारिंशतितमः परिवर्तः ॥३९]

1 A नामकानां ; B नामकायं ; Tib. 271a, l. 6: མགོན་པོ་རྣམས་ཀྱི །

2 B ॰जानता अभियु॰

3 A प्रतिबिद्ध॰

4 B adds पदं परिवर्त एकचत्वारिंशतितमः ।

अथ खलु भगवांस्तस्यां वेलायामिमा गाथा अभाषत ।

विपुला बुद्धधर्मा हि विपुलो देशितो नयः ।
विपुलं धर्मं देशित्वा विपुलाल्लँभते गुणान् ॥१॥
यथा विपुलमाकाशमेवं धर्माण लक्षणम् ।
रत्नानि विपुलान् यत्र तस्माद्वैपुल्यमुच्यते ॥२॥
विपुलाचरि सत्त्वानां विपुला तेषु देशिता[1] ।
विपुलो आगमो यस्य तस्माद्वैपुल्यमुच्यते ॥३॥

अस्मिन् खलु पुनः सर्वधर्मस्वभावसमताविपञ्चितसमाधिनिर्देशे धर्मपर्याये भाष्यमाणेऽप्रमेयैः सत्त्वैरनुत्तरायां सम्यक्संबोधौ चित्तान्युत्पादितान्यप्रमेयाश्च सत्त्वा अवैवर्तिका अभूवन्ननुत्तरायां सम्यक्संबोधौ । अप्रमेयाणाञ्च सत्त्वानां प्रत्येकबोधौ चित्तमुत्पन्नम् । अप्रमेयाणाञ्च सत्त्वानामर्हत्त्वफलसाक्षात्क्रियायां चित्तान्युत्पन्नानि। अयञ्च त्रिसाहस्रमहासाहस्रलोकधातुः षड्विकारं कम्पितः प्रकम्पितः संप्रकम्पितः । चलितः प्रचलितः संप्रचलितः । वेधितः प्रवेधितः संप्रवेधितः । क्षुभितः प्रक्षुभितः संप्रक्षुभितः । रणितः प्ररणितः संप्ररणितः । गर्जितः प्रगर्जितः संप्रगर्जितः । पूर्वा दिगवनमति पश्चिमा दिगुन्नमति । पश्चिमा दिगवनमति पूर्वा दिगुन्नमति । उत्तरा दिगुन्नमति दक्षिणा दिगवनमति । उत्तरा दिगवनमति दक्षिणा दिगुन्नमति । अन्तादवनमति

1 B देशना

मध्यादुन्नमति। मध्यादवनमति अन्तादुन्नमति। अप्रमेयस्य चावभासस्य लोके प्रादुर्भावोऽभूत्।

महच्च [1]दिव्यगन्धवर्षमभिप्रावर्षत्। देवताश्च महान्तं दिव्यं पुष्पवर्षमुत्सृजन्ति स्म। दिव्यानि च तूर्यशतसहस्राण्युपर्यन्तरीक्षे भ्रामयन्त्येवं च वाचमभाषन्त।

सुलब्धा लाभास्तेषां सत्त्वानां य इमं महाकरुणावतारं धर्मपर्यायं श्रोष्यन्ति। बहुबुद्धपर्युपासितास्ते सत्त्वा भविष्यन्ति य इमं सर्वधर्मस्वभावसमताविपंचितसमाधिं[2] पुनः पुनः श्रोष्यन्ति। श्रुत्वा च लिखिष्यन्ति उद्ग्रहीष्यन्ति धारयिष्यन्ति पर्यवाप्स्यन्ति अरणभावनया भावयिष्यन्ति बहुली करिष्यन्ति परेभ्यश्च विस्तरेण संप्रकाशयिष्यन्ति सर्वसत्त्वानां ते दक्षिणीया भविष्यन्ति।

अथ खलु भगवानायुष्मन्तमानन्दमामन्त्रयते स्म। उद्गृह्णीष्व त्वमानन्देमं धर्मपर्यायं धारयेत् वाचयेत् पर्यवाप्नुहि परेषाञ्च विस्तरेण संप्रकाशय। अथ खल्वायुष्मानानन्दो भगवन्तमेतदवोचत्। को नामायं भगवन् धर्मपर्यायः। कथञ्चैनं धारयामि। भगवानाह। महाकरुणावतारो नामानन्द इदं सूत्रं धारय। सर्वधर्मसमताविपञ्चितो नाम समाधिरिति धारय। आनन्द आह। उद्गृहीतो मे भगवन्नयं धर्मपर्याय इति। इदमवोचद् भगवानात्तमनाश्चन्द्रप्रभः कुमारभूत आयुष्मांश्चानन्दस्ताश्चतस्रः पर्षदो भिक्षुभिक्षुण्युपासकोपासिका अनेके च

1 A दिव्यं गन्धवर्ष० 2 A omits विपंचित

शुद्धावासकायिका देवपुत्राः सदेवमानुषासुरगन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति ।

इत्यार्यसर्वधर्मस्वभावसमताविपञ्चितात् समाधेर्यथालब्धं
समाधिराजं नाम महायानसूत्रं परिवर्तो नाम
चत्वारिंशतितमं समाप्तम्[1] ॥४०॥

ये धर्मा हेतुप्रभवा हेतुस्तेषां तथागतो ह्यवदत् ।
तेषां च यो निरोध एवं वादि महाश्रमणः[2] ॥

1 A परिवर्तो नामैकचत्वारिंश० ; B यथालब्धपरिवर्तो नाम द्वाचत्वारिंशतितमः समाप्तम् ।

2 A adds यं देवनागनरकिन्नरदैत्यवृन्दश्चिन्तामणिं वृतमिवेति समाधिराजः ।

कैवल्यदागुणमयैः कथिता मुनीन्द्रैः ।
पायात्सारो विविधपुण्यनिधान वह्लीवल्लीम् ॥

ग्लौ-वह्न्यासन-नाग-विप्र-पति-गे-वै-हायने विक्रमे नेपालेब्जज दोर्म हङ्क मिलितगौरे नभोमासि च । वाताहारतिथौ कवे रहनि हंसे कर्क्कटेपाणिमे सान्ध्येयोगयुतेभामिथभूते गौर्यां शशिः संस्रते ।

वाग्वजान्वय संभवस्य हृदमानन्दस्य प्रागात्मजो मैत्रो ।
पूर्भावनोदभवोऽमभृतानन्दोपवर्गेप्सितः ॥
स्वार्थेयं हि समाधिराजमलिखन् नत्वा गुरुं श्रीघनं ।
मात्राविन्दुविसगरेफमखिलं भ्रान्तिस्तशोध्यं सता ॥ शुभम् ॥

APPENDIX

(Vide Mahāvyutpatti)

अकुशलानि (दश)

[Ten evil deeds]

see कुशलानि

अक्षणाः (अष्टौ)

[Unhappy states]

१। नरकाः
२। तिर्यञ्चः
३। प्रेताः
४। दीर्घायुषो देवाः
५। प्रत्यन्तजनपदम्
६। इन्द्रियवैकल्यम्
७। मिथ्यादर्शनम्
८। तथागतानामनुत्पादः

अधिष्ठानानि (चत्वारि)

[Firm determination]

१। सत्याधिष्ठानम्
२। त्यागाधि०
३। उपशमाधि०
४। प्रज्ञाधि०

अप्रमाणानि (चत्वारि) (=ब्रह्मविहाराः)

[Extension of undernoted mental states to unlimited spheres]

१। मैत्री
२। करुणा
३। मुदिता
४। उपेक्षा

अभिज्ञानामानि (षट्)

[Superknowledge or superpowers]

१। दिव्यचक्षुः
२। दिव्यश्रोत्रम्
३। परस्य चेतःपर्यायज्ञानम्
४। पूर्वनिवासानुस्मृतिज्ञानम्
५। ऋद्धिविधिज्ञानम्
६। आस्रवक्षयज्ञानम्

इन्द्रियाणि (पञ्च)

[Predominating faculties]

१। श्रद्धेन्द्रियम्
२। वीर्येन्द्रियम्
३। स्मृतीन्द्रियम्
४। समाधीन्द्रियम्
५। प्रज्ञेन्द्रियम्

उपायकौशल्यम्

[Expedients resorted to by Buddhas and Bodhisattvas to impart training to the ignorant]

see पारमिता

उपोसथः

[Eight precepts observed by the laity on auspicious days]

see शिक्षापदानि

ऋद्धिपादाः (चत्वारः)

[Four means to attain miraculous powers. Exertions for concentration of intention, thought, energy and investigation]

१। छन्दसमाधिप्रहाणसंस्कारसमन्वागत-ऋद्धिपादाः
२। चित्तसमाधिप्र०

३। वीर्यसमाधिप्र०
४। मीमांसासमाधिप्र०

(cf Visuddhimagga xii)

कुशलमूलानि

[Roots of good deeds]

१। अलोभः
२। अद्वेषः (=अदोषः)
३। अमोहः

कुशलानि (दश)

[Ten good deeds]

१। त्रीणि कायसुचरितानि
प्राणातिपाताद्विरतिः
अदत्तादानाद्विरतिः
काममिथ्याचाराद्विरतिः
२। चत्वारि वाक्सुचरितानि
मृषावादात् प्रतिविरतिः
पारुष्यात् प्र०
पैशुन्यात् प्र०
संभिन्नप्रलापात् प्र०
३। त्रीणि मनःसुचरितानि
अभिध्यायाः प्रतिविरतिः
व्यापादात् प्र०
मिथ्यादृष्टेः प्र०

Opposites of these are दशाकुशलानि। See also शिक्षापदानि

तथागतबलानि

see बलानि

तथागतवैशारद्यानि

see वैशारद्यानि

धातुः (त्रिः)

[Three spheres of existence]

१। कामधातुः
२। रूपधातुः
३। अरूप(आरूप्य)धातुः

बोधिसत्त्वधारण्यः (द्वादश)

[Formula learnt by Bodhisattvas]

१। अभिषेचनी
२। ज्ञानवती
३। विशुद्धस्वरनिर्घोषा
४। अक्षयकरण्डा
५। अनन्तावर्ता
६। सागरमुद्रा
७। पद्मव्यूहा
८। असङ्गमुखप्रवेशा
९। प्रतिसंविन्निश्चयावतारा
१०। बुद्धालङ्काराधिष्ठिता
११। अनन्तवर्णा
१२। बुद्धकायवर्णपरिनिष्पत्त्यभिनिर्हारा

धूतगुणाः (द्वादश)

[Rigorous practices]

१। पांशुकुलिकः
२। त्रैचीवरिकः
३। नामन्तिकः (in Pali सपदानिको)
४। पैण्डपातिकः (पत्तपिण्डिको)
५। ऐकासनिकः
६। खलुपश्चाद्भक्तिकः
७। आरण्यकः
८। वृक्षमूलिकः
९। आभ्यवकाशिकः
१०। श्माशानिकः
११। नैषदिकः
१२। याथासंस्तरिकः

ध्यानानि (चत्वारि)

[Meditations]

१। स विविक्तं कामैर्विविक्तं पापकैरकुशलधर्मैः सवितर्कं सविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसम्पद्य विहरति।

२। स वितर्कविचाराणां व्युपशमात् अध्यात्मं संप्रसादाच्चेतसः एकोदीभावाद-वितर्कमविचारं समाधिजं प्रीतिसुखं द्वितीयं ध्यानमुपसम्पद्य विहरति।

३। स प्रीतेर्विरागादुपेक्षको विहरति स्मृतः संप्रजानन् सुखं च कायेन प्रतिसंवेदयति यत्तदार्या आचक्षते उपेक्षकः स्मृतिमान् सुखं विहरतीति निष्प्रीतिकं तृतीयं ध्यानमुप-सम्पद्य विहरति।

४। स सुखस्य च प्रहाणाद् दुःखस्य च प्रहाणात् पूर्वमेव सौमनस्यदौर्मनस्ययोरस्तं-गमाददुःखासुखम् उपेक्षास्मृतिपरिशुद्धं चतुर्थं ध्यानमुपसम्पद्य विहरति।

नामरूपम्

[lit. name and form-mind and matter]

see स्कन्धाः (पञ्चोपादानाः)

पारमिताः (षट्)

[Perfections)

१। दानपारमिता
२। शीलपा०
३। क्षान्तिपा०
४। वीर्यपा०
५। ध्यानपा०
६। प्रज्ञापा०

(अन्याश्चतस्रः)

७। उपायकौशल्यपा०
८। प्रणिधानपा०
९। बलपा०
१०। ज्ञानपा०

प्रतिसंविदः (चत्वारः)

[Analytical knowledge]

१। धर्मप्रतिसंवित्
२। अर्थप्र०
३। निरुक्तिप्र०
४। प्रतिभानप्र०

(For Mahāyānic exposition see chaps. xxiii, xxiv)

प्रातिहार्याणि (त्रीणि)

[Extraordinary powers]

१। ऋद्धिप्रातिहार्यम्
२। आदेशनाप्रा०
३। अनुशासनीप्रा०

बलानि (पञ्च)

[Powers to be acquired for spiritual perfection]

१। श्रद्धाबलम्
२। वीर्यब०
३। स्मृतिब०
४। समाधिब०
५। प्रज्ञाब०

see इन्द्रिय

(दश तथागतबलानि)

(Powers attained by the Tathāgatas)

१। स्थानास्थानज्ञानबलम्
२। कर्मविपाकज्ञा०
३। नानाधिमुक्तिज्ञा०
४। नानाधातुज्ञा०
५। इन्द्रियवरावरज्ञा०
६। सर्वत्रगामनीप्रतिपज्ज्ञा०
७। सर्वध्यानविमोक्षसमाधिसमापत्ति-संक्लेश-व्यवदानव्युत्थानज्ञा०
८। पूर्वनिवासानुस्मृतिज्ञा०
९। च्युत्युत्पत्तिज्ञा०
१०। आस्रवक्षयज्ञा०

(दश बोधिसत्त्वबलानि)

(Powers to be acquired by Bodhisattvas)

१ । आशयबलम्
२ । अध्याशयब०
३ । प्रयोगब०
४ । प्रज्ञाब०
५ । प्रणिधानब०
६ । यानब०
७ । चर्याब०
८ । विकुर्वणब०
९ । बोधिब०
१० । धर्मचक्रप्रवर्तनब०

बुद्धधर्माः (अष्टादशावेणिक)

[Attaniments of a Buddha]

१ । नास्ति तथागतस्य स्खलितम्
२ । नास्ति रवितम्
३ । नास्ति मुषितस्मृतिः
४ । नास्त्यसमाहितचित्तम्
५ । नास्ति नानात्वसंज्ञा
६ । नास्त्यप्रतिसंख्यायोपेक्षा
७ । नास्ति छन्दहानिः
८ । नास्ति वीर्यहानिः
९ । नास्ति स्मृतिहानिः
१० । नास्ति समाधिहानिः
११ । नास्ति प्रज्ञाया हानिः
१२ । नास्ति विमुक्तिहानिः
१३ । सर्वकायकर्मज्ञानपूर्वंगमं ज्ञानानु परिवर्ति
१४ । सर्ववाक्कर्मज्ञानपूर्वंगमं ज्ञानानुपरिवर्ति
१५ । सर्वमनःकर्मज्ञानपूर्वंगमं ज्ञानानुपरिवर्ति
१६ । अतीतेऽध्वन्यसंगमप्रतिहतं ज्ञानदर्शनं प्रवर्तते
१७ । अनागतेऽध्वन्यसंगमप्रतिहतं ज्ञानदर्शनं प्रवर्तते
१८ । प्रत्युत्पन्नेऽध्वन्यसंगमप्रतिहतं ज्ञान-दर्शनं प्रवर्तते ।

बोधिपक्षीयधर्माः (सप्तत्रिंशत्)

[Thirtyseven practices pertaining to perfect knowledge]

स्मृत्युपस्थानानि ४
सम्यक्प्रहाणानि ४
ऋद्धिपादाः ४
इन्द्रियाणि ५
बलानि ५
बोध्यङ्गानि ७
मार्गनामानि ८

बोधिसत्त्वधारणी

see धारण्यः

बोधिसत्त्वबलानि

see बलानि

बोधिसत्त्ववशिता

see वशिता

बोधिसत्त्व-वैशारद्यानि

see वैशारद्यानि

बोध्यङ्गानि (सप्त)

[Seven limbs of enlightenment]

१ । स्मृतिसंबोध्यङ्गम्
२ । धर्मप्रविचयसं०
३ । वीर्यसं०
४ । प्रीतिसं०
५ । प्रश्रब्धिसं०
६ । समाधिसं०
७ । उपेक्षासं०

ब्रह्मविहाराः

see अप्रमाणानि

मार्गनामानि (अष्ट)

[Eightfold Path]

१ । सम्यग् दृष्टिः

२ । स० संकल्पः
३ । स० वाक्
४ । स० कर्मान्तः
५ । स० आजीवः
६ । स० व्यायामः
७ । स० स्मृतिः
८ । स० समाधिः

लोकधर्माः (अष्टौ)

[Mundane aims and objects]

१ । लाभः
२ । अलाभः
३ । यशः
४ । अयशः
५ । निन्दा
६ । प्रशंसा
७ । सुखम्
८ । दुःखम्

वशिता (दश बोधिसत्त्व-)

[Self-restraint to be acquired by Bodhisattvas]

१ । चित्तवशिता
२ । परिष्कारव०
३ । आयुर्व०
४ । कर्मव०
५ । उपपत्तिव०
६ । अधिमुक्तिव०
७ । धर्मव०
८ । प्रणिधानव०
९ । ऋद्धिव०
१० । ज्ञानव०

विमोक्षाः (अष्टौ)

[Meditational means leading to emancipation]

१ । रूपी रूपाणि पश्यत्ययं प्रथमो विमोक्षः ।

२ । अध्यात्ममरूपसंज्ञी बहिर्धा रूपाणि पश्यत्ययं द्वितीयो विमोक्षः ।

३ । शुभं विमोक्षं कायेन साक्षात्-कृत्वोपसम्पद्य विहरत्ययं तृतीयो विमोक्षः ।

४ । स सर्वशो रूपसंज्ञानां समतिक्रमात् प्रतिघसंज्ञानां अस्तंगमात् नानात्वसंज्ञानाम-मनसिकारादनन्तमाकाशमित्याकाशानन्त्यायत-नमुपसम्पद्य विहरत्ययं चतुर्थो विमोक्षः ।

५ । स सर्वश आकाशानन्त्यायतनं समतिक्रम्यानन्तं विज्ञानमिति विज्ञानानन्त्या-यतनमुपसम्पद्य विहरत्ययं पञ्चमो विमोक्षः ।

६ । स सर्वशो विज्ञानानन्त्यायतनं समतिक्रम्य नास्ति किञ्चिदित्याकिञ्चन्यायतन-मुपसम्पद्य विहरत्ययं षष्ठो विमोक्षः ।

७ । स सर्वश आकिञ्चन्यायतनं समतिक्रम्य नैवसंज्ञानासंज्ञायतनमुपसम्पद्य विहरत्ययं सप्तमो विमोक्षः ।

८ । स सर्वशो नैवसंज्ञानासंज्ञायतनं समतिक्रम्य संज्ञावेदितनिरोधं कायेन साक्षात्-कृत्वोपसम्पद्य विहरत्ययमष्टमो विमोक्षः ।

see समापत्तिनामानि

विमोक्षमुखानि (त्रीणि)

[Steps leading to emancipation]

१ । शून्यता
२ । अनिमित्तम्
३ । अप्रणिहितम्

see p. 407 : विमोक्षद्वार

वैशारद्यानि (चत्वारि बोधिसत्त्वानाम्)

[Absence of fear due to self-reliance]

१ । धारणीश्रुतोद्ग्रहणार्थनिर्देशवैशारद्यम्
२ । नैरात्म्याधिगमात् परविहेठना-निमित्त-

समुदाचारसहजानधिगतेर्यापथ-त्रिष्कर्म-परिशुद्ध-महारत्नसम्पन्नवैशारद्यम्
३। सदोद्गृहीतधर्माविस्मरणप्रज्ञोपायनिष्ठागतसत्त्वनिस्तारणप्रसादसंदर्शनशुभानन्तरायिकवैशारद्यम्
४। सर्वज्ञताचित्तासंप्रमोषान्ययानानिर्याणसम्पूर्णवशितासर्वप्रकारसत्त्वार्थसंप्रापणवैशारद्यम्

वैशारद्यानि (चत्वारि तथागतस्य)

१। सर्वधर्माभिसम्बोधिवैशारद्यम्
२। सर्वास्रवक्षयज्ञानवै०
३। अन्तरायिकधर्मानन्यथात्वनिश्चितव्याकरणवै०
४। सर्वसंपदधिगमाय नैर्याणिकप्रतिपत्तथात्ववै०

शिक्षापदानि (अष्टौ)

[Moral precepts]

१। प्राणातिपातविरतिः
२। अदत्तादानवि०
३। अब्रह्मचर्यवि०
४। मृषावादवि०
५। मद्यपानवि०
६। गन्धमाल्यविलेपनवर्णकधारणवि०
७। उच्चशयन-महाशयनवि०
८। विकालभोजनवि०

शिक्षापदानि (दश)

[The above eight and the following two:]

९। नृत्यगीतवादितादिदर्शनविरतिः
१०। जातरूपरजतग्रहणविरतिः

see also कुशलमूलानि

समापत्तिनामानि

[Higher meditations]

see विमोक्षाः 4, 5, 6, 7

सम्यक्प्रहाणानि (चत्वारि)

[Four right exertions]

१। अनुत्पन्नानां पापकानामकुशलानां धर्माणामनुत्पादाय च्छन्दं जनयति।

२। उत्पन्नानां पापकानामकुशलानां धर्माणां प्रहाणाय च्छन्दं जनयति।

३। अनुत्पन्नानां कुशलानां धर्माणामुत्पादाय च्छन्दं जनयति।

४। उत्पन्नानां कुशलानां धर्माणां स्थितये भूयोभावतायै असंप्रमोषाय परिपूर्णाय च्छन्दं जनयति।

स्कन्धाः (असमसमाः पञ्च)

[Group of excellent practices]

१। शीलस्कन्धः
२। समाधिस्क०
३। प्रज्ञास्क०
४। विमुक्तिस्क०
५। विमुक्तिज्ञानदर्शनस्क०

स्कन्धाः (पञ्चोपादानाः)

[Group of constituents]

१। रूपस्क०
२। वेदनास्क०
३। संज्ञास्क०
४। संस्कारस्क०
५। विज्ञानस्क०

स्मृत्युपस्थानानि (चत्वारि)

[Four types of contemplation through awareness]

१। कायस्मृत्युपस्थानम्
२। वेदनास्मृ०
३। चित्तस्मृ०
४। धर्मस्मृ०

स्वराङ्ग नामानि (षष्टिः)

[Sixty kinds of sweet voices]

see Mahāvyutpatti xx

INDEX